राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - 74

श्रीकिरीटिवेङ्कटाचार्यविरचितं

प्रामाण्यवादखण्डनम्

(गदाधरभट्टाचार्यविरचितप्रामाण्यवादग्रन्थस्य विमर्शात्मकोऽयं ग्रन्थः)

सम्पादकः

आचार्यः का.इ. देवनाथः

राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

तिरुपतिः - ५१७ ५०७ (आं.प्र.)

Rashtriya Sanskrit Vidyapeetha Series - 74

Prāmāṇyavāda Khaṇḍanam

of

Śrī Kirīṭi Veṅkaṭācārya

79-B-4

24671

Edited with explanatory notes by

Prof. K. E. Devanathan

RASHTRIYA SANSKRIT VIDYAPEETHA
(Deemed University)
TIRUPATI - 517 507 (A.P.)

Rs 102-

Śrī Kirīṭi Veṅkaṭācārya Viracitaṁ

Prāmāṇyavāda Khaṇḍanam

Edited with explanatory notes by

Prof. K. E. Devanathan

First Edition : October, 2000

Copies : 500

© All Rights reserved with Vidyapeetha

Published by
Prof. D. PRAHLADA CHAR
Vice Chancellor
Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Tirupati - 517 507 (A.P.)

Rs 102

Printed at
Rashtriya Sanskrit Vidyapeetha
Tirupati

प्रो. डि. प्रह्लादाचार्यः
© : (08574) 27937
कुलपतिः
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७ (आ.प्र.)

प्रस्तावना

मानितविश्वविद्यालयत्वेन प्रथितेन तिरुपतिराष्ट्रियसंस्कृत-विद्यापीठेन सप्तत्यधिकसंख्याकाः शास्त्रसम्बन्धिनः ग्रन्थाः प्राकाश्यं नीताः। तत्र केचन पूर्वमप्रकाशिताः, केचिच्च आधुनिकैः विद्वद्वरेण्यैः निर्मिताः। विद्यापीठस्यास्य प्रकाशनं विद्वल्लोके सानन्दमाद्रियमाणं वरीवर्तीति जानन्त्येव सर्वे सुरसरस्वती समुपासकाः।

तत्रापि न्यायशास्त्रीयाः ग्रन्थाः विद्यापीठेनानेन बहवः प्रकाशिताः। इदं हि श्लाघास्पदं यत् इदानीं पठनपाठनसंप्रदाये वर्तमानाः प्रायः सर्वेऽपि न्यायग्रन्थाः विद्यापीठेन प्रकाशिता इति। अन्यच्चात्र वक्तव्यं यत् प्रकाशन्यायशिखामणिव्याख्योपेतस्य तत्त्वचिन्तामणिग्रन्थस्य विद्यापीठकुलपतिचरैः चतुःशास्त्रनिष्णातैः श्रीमद्भिः एन्.एस्. रामानुजताताचार्यैः प्रकाशनेनैव नव्यन्यायमूलग्रन्थभूतस्य तत्त्वचिन्तमणेः प्रथितप्रचारः दक्षिणभारते समपद्यत इति। एवं व्याकरणवेदादिसम्बन्धिनोऽपि ग्रन्थाः विद्यापीठेन प्रकाशिताः विद्यापीठस्य प्रतिष्ठां वर्धयन्ति।

ऐषमः न्यायवैशेषिकदर्शनयोः भारतीयदर्शनेषु प्रभाव इति विषयमधिकृत्य विद्यापीठेन सञ्चाल्यमानाम् अखिलंभारतस्तर-

संगोष्ठीमभिलक्ष्य प्रामाण्यवादखण्डनाभिधः ग्रन्थः प्रकाश्यते। एतद्ग्रन्थस्य रचयितारः सुरपुराभिजनाः किरीटिवेङ्कटाचार्याः । ग्रन्थोऽयं श्रीगदाधरभट्टाचार्यविरचितस्य प्रामाण्यवादस्य प्रथमद्वितीयविप्रतिपत्तिविचारभागस्थान् विषयविशेषान् परिशीलयति । ग्रन्थकर्तारश्चेमे अष्टादशशतके क्रैस्तवीये आन्ध्रप्रदेशीयसुरपुरग्रामे न्यवसन्। नानाशास्त्रेषु निष्णाता एते अनेकग्रन्थान् प्रणीय तद्द्वारा प्रथिताश्चासन् ।

तस्यैतस्य प्रामाण्यवादखण्डनाभिधस्य ग्रन्थस्य सम्पादनं विशिष्टाद्वैतवेदान्तविभागे आचार्यैः श्री के.ई. देवनाथन् महोदयैः महान्तं परिश्रमम् अनुभूय अल्पीयस्येव काले विहितमिति तानहं भृशमभिनन्दामि। विश्वसिमि च यदनेन प्रकाशनेन न्यायशास्त्ररसिको विद्वल्लोकः नितरां सन्तुष्यतीति ।

– आचार्य डि. प्रह्लादाचार्यः

विषयसूची

पृष्ठसंख्या

१. उपोद्घातः ।

प्रामाण्यवादखण्डनम्

२. प्रथमविप्रतिपत्तिः 1

३. प्रथमश्लोकार्थविवरणम् 1

४. द्वितीयश्लोकार्थविवरणम् 3

५. फलवच्छास्त्रोपकरणत्वेनेतिदीधितिविवरणविचारः 3

६. तृतीयश्लोकार्थविवरणम् 5

७. चतुर्थश्लोकविवरणम् 6

८. यस्य संशयव्यतिरेकनिश्चयौ - इतिनियमविचारः 7

९. पञ्चमश्लोकविवरणम् 8

१०. स्वरूपसम्बन्धरूपावच्छेदकत्वसमर्थनम् 11

११. षष्ठश्लोकार्थविवरणम् 12

१२. सप्तमश्लोकविवरणम् 15

१३. भट्टाचार्योक्तार्थान्तरदोषासंभवोपपादनम् 17

१४. भट्टाचार्योक्तप्रथमविप्रतिपत्तिनिष्कर्षप्रतिपादनम् 20

१५. ज्ञानग्राहकत्वदलपरिष्कारः 24

१६. अप्रामाण्यपदार्थविचारः 26

१७. अष्टमश्लोकविवरणम् 26

१८. अप्रामाण्यपदार्थनिष्कर्षपूर्वकम् अप्रामाण्याग्राहकत्वनिष्कर्षः 28

१९. अप्रामाण्याग्राहकत्वनिष्कर्षसमर्थनम् 36
२०. सामग्रीपदसार्थक्य यावत्पदसार्थक्ययोः विचारः 37
२१. न्यायकौस्तुभरीत्या विधिकोटिनिष्कर्षः तत्परिशीलनं च 40
२२. दीधित्युक्तस्य 'अन्नवदन्ति' कल्पस्य विचारः 41
२३. द्वितीयविप्रतिपत्तिः 49
२४. यत्तु इत्यादिना भट्टाचार्यमतानुवादः, तत्परिशीलनं च 49
२५. नवमश्लोकार्थविवरणम् 53
२६. द्वितीयपक्षे अर्थान्तरदोषाविष्कारः तत्समाधानं च 53
२७. मिश्रमतसंग्रहस्य प्रस्तावः, तत्खण्डनं च 58
२८. मिश्रमतसंग्रहार्थ पक्षान्तरप्रस्तावः 59
२९. यथार्थघटेच्छादिशिरोमणिग्रन्थविरोधोपपादनम् 60
३०. द्वितीयपक्षे लक्षणनिष्कर्षप्रदर्शनम् 61
३१. दशमश्लोकार्थविवरणम् 62
३२. योगजधर्माजन्यत्वस्यान्तिमज्ञाने विशेषणत्वकथनम् 63

उपोद्घातः

अथेदानीं विदुषां सविधे सप्रश्रयं समर्प्यते प्रामाण्यवाद-खण्डनाभिधोऽयं ग्रन्थः श्रीमद्भिः सुरपुरग्रामाभिजनैः विख्यातवैभवैः किरीटिवेङ्कटाचार्यैः विरचितः। अस्य ग्रन्थस्य प्रप्रथमं मुद्रिततां प्राप्तस्य विषये किञ्चिदिव प्रस्तूयते।

प्रामाण्यवादग्रन्थस्य स्थानम्

'गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणिग्रन्थे प्रत्यक्षखण्डे मङ्गलवादानन्तरं प्रामाण्यवादो वर्तते। अस्ति च प्रथा प्रामाण्यवाद एव गन्थादित्वेन मणिकृदभिमत इति, अत एव 'अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षु' रित्यारभ्य मणिकृता स्वग्रन्थस्य न्यायशास्त्रार्थैकदेशप्रतिपादकत्वं प्रतिपाद्य तदन्तर्गतस्य प्रथमपदार्थस्य प्रमाणरूपस्य प्रतिपादनं प्रतिज्ञातम्।

तत्र हि प्रामाण्यवादे प्रामाण्यज्ञप्तिवादः, प्रामाण्योत्पत्तिवाद इति भागद्वयं वर्तते। तत्र प्रामाण्यज्ञप्तिवादे प्रामाण्यस्य स्वतोग्राह्यत्वं परतोग्राह्यत्वं वा - इति विचारः कृतः। तत्र पञ्चविप्रतिपत्तयः प्रदर्शिताः।

प्रामाण्यपदार्थविवेचनम्

प्रशब्दोपसंहितमाधातोरुपरि ल्युट्प्रत्यययोगेन प्रमाणशब्दो निष्पन्नः। ल्युट्प्रत्ययः भावार्थकः करणार्थकश्च भवति। प्रमाणशब्दस्य भावार्थकत्वे प्रमैव प्रमाणम्, तस्य भावः प्रामाण्यं प्रमात्वमिति लभ्यते। अनुभवो द्विविधः यथार्थानुभवः, अयथार्थानुभवश्चेति नैयायिकैः स्वीक्रियते। तत्र यथार्थानुभवस्य प्रमेति नाम। प्राभाकरमते अयथार्थानुभवो न स्वीक्रियते, अनुभवमात्रमेव प्रमा तन्मते। तत्र प्रमानिष्ठं प्रमात्वं स्वतोग्राह्यमिति मीमांसकाः। ते च त्रयः प्राभाकरमुरारिमिश्रकुमारिलभट्टाख्याः।

वेदान्तिनोऽपि प्रमात्वं स्वतोग्राह्यमिति वदन्ति। आधुनिकनैयायिकप्रवरा श्रीराजेश्वरशास्त्रिद्राविडा अपि प्रमात्वं स्वतोग्राह्यमिति उररीकुर्वन्ति। नैयायिकास्तु प्रमात्वं परतोग्राह्यम् इति स्थापयन्ति।

स्वतोग्राह्यत्वस्वरूपम्

प्रामाण्यस्य स्वतोग्राह्यत्वं नाम किमिति चिन्त्यते। तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वम् तदिति शास्त्रकारा लिखन्ति। तेषामयमाशयः - ज्ञानग्राहिकया यावत्या सामग्र्या तदप्रामाण्याग्राहिकया ज्ञाननिष्ठं प्रमात्वमपि गृह्यते। यथा ज्ञाने गृह्यमाणे तद्गतं ज्ञानत्वमपि गृह्यते, तथा प्रमात्वमपि नियमेन गृह्यते इति। एवं च ज्ञानविषयकं तद्गताप्रामाण्याविषयकं सर्वमपि ज्ञानं ज्ञाने विद्यमानं प्रमात्वमपि गृह्णाति। प्राभाकरमते ज्ञानं मितिमातृमेयविषयकं स्वप्रकाशमिति स्वीक्रियते, तथा च स्वप्रकाशं ज्ञानं यथा घटादिनिरूपित-विषयिताश्रयो भवति तथा स्वनिरूपितविषयिताश्रयोऽपि भवति - इति तस्मिन् स्वनिरूपितविषयिताश्रयत्वमिव स्ववृत्तिप्रमात्वविषयकत्वमपि भवतीति स्वतोग्राह्यत्वम्। मुरारिमिश्रमते ज्ञानस्य स्वप्रकाशत्वं न स्वीक्रियते, ज्ञानमनुव्यवसायेन घटत्वेन घटमहं जानामीत्याकारेण गृह्यते, तेन हि ज्ञानं गृह्यते, ज्ञानं हि विषयनिरूप्यम्, विषयं विना हि ज्ञानं न निरूपयितुं शक्यम्। अतः अनुव्यवसायेन विषयविशिष्टं ज्ञानमेव ग्राह्यं भवति, ज्ञानांशे घटत्वप्रकारकत्वमिव घटत्ववद्विशेष्यकत्वमपि भासत इति घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वरूपं प्रामाण्यमनुव्यवसायस्य विषयः। भट्टमते तु ज्ञानमतीन्द्रियम् अर्थात् ज्ञानं नानुव्यवसायग्राह्यम्, नापि स्वप्रकाशम्, नहि बहिरिन्द्रियाणि आत्मविशेषगुणस्य ज्ञानस्य ग्रहणे समर्थानि भवन्तीति ज्ञानमनुमानवेद्यम् इति स्वीक्रियते। एवं च ज्ञानेन जन्यो यः ज्ञातताख्यो विषयगतोऽतिशयः प्रत्यक्षः, तेन ज्ञानमनुमीयत इति। अयं घटः घटत्व प्रकारकज्ञानविषयः, घटत्वप्रकारकज्ञाततावत्त्वादिति अनुमानं

विवक्षितम् । ज्ञाततायाः सप्रकारकत्वमस्मिन् मते स्वीक्रियते। अन्यथाख्यातिवादे विषयताया अतिरिक्तत्ववादिनां मते तस्याः सप्रकारकत्वं स्वीकृत्य रजतत्वप्रकारकविषयता अरजतवृत्तिरित्यादि अनुमानं मणिकारेण प्रदर्शितम् ।

वेदान्तिषु प्रायः प्रमात्वस्वतोग्राह्यत्ववाद ऊरीकृतोऽस्ति। विशिष्टाद्वैतवेदान्तिनः ज्ञानस्य स्वप्रकाशत्ववादिनः प्रमात्वस्वतस्त्ववादिनश्चेति प्रसिद्धाः ।

प्रमाणयस्य परतोग्राह्यत्वम्

नैयायिकाः प्रमात्वं परतोग्राह्यमिति वदन्ति। तेषां मते ज्ञानविषयकं सर्वमेव ज्ञानं तद्गतप्रमात्वविषयकं नेति स्वीक्रियते । अनुव्यवसायेन हि विषयविशिष्टस्य ज्ञानस्य ग्रहणेऽपि तद्गतं प्रमात्वं न गृह्यते । प्रमात्वं हि न घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वमात्रम्, तस्यानुव्यवसायेनैव ग्रहीतुं शक्यत्वात् । परन्तु घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमेव । तच्च नानुव्यवसायवेद्यमिति । तन्मते अनुमानेनैव प्रामाण्यं गृह्यते । अर्थनिश्चयानन्तरं प्रवृत्तौ सत्त्यां तस्याः सफलत्वेऽवगते सफलप्रवृत्तिजनकत्वहेतुना प्रवृत्तिजनकज्ञानस्य प्रमात्वं साध्यते। तत्र हि व्यतिरेकव्याप्तिः प्रयोजिकेति स्वीक्रियते, तत्र अप्रमैव दृष्टान्तो भवति ।

नैयायिकास्तु प्रमात्वस्य स्वतोग्राह्यत्वं खण्डयन्ति। यदि प्रमात्वं स्वतोग्राह्यं स्यात् तदा अनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयो न स्यात् । अनभ्यासदशापन्नज्ञानं नाम सफलप्रवृत्तिजनकत्वलिङ्गकानुमित्यनुत्तरज्ञानम्। यदा जलज्ञानं जातम् तदनन्तरं जलज्ञानं स्वप्रकाशेन, अनुव्यवसायेन, ज्ञाततालिङ्गकानुमित्या वा गृहीतं चेत् तद्वृत्तिप्रमात्वमपि गृहीतं भवतीति तदनन्तरं जलज्ञानं प्रमा वा नवेति संशयो न स्यात् । यदि अनुव्यवसायादिना जलज्ञानमेव पूर्वं न गृहीतमिति कथ्यते तदा

धर्मिज्ञानाभावात् कथं संशयोत्पत्तिः। संशये धर्मिज्ञानस्य कारणत्वात्। न च प्रामाण्यं परतोग्राह्यं चेत् प्रामाण्यविषयकानुमितेरपि प्रामाण्यमन्येनानुमानेन वेद्यमिति अनवस्था स्यादिति वाच्यम्, प्रामाण्यस्यावश्यज्ञेयत्वानभ्युपगमात् अनवस्थाया अभावात्।

प्रामाण्यवाददीधितिगादाधर्योः परिचयः

तत्त्वचिन्तामणिप्रकरणभूतस्य प्रामाण्यवादस्य विवरणं बहुभिः कृतम्। तत्र प्राचीनतमं भवति पक्षधरमिश्राणामालोकनामकं व्याख्यानम्। तस्य व्याख्यानस्य तत्र तत्र गदाधरभट्टाचार्यैः परिशीलनमपि कृतमस्ति। आलोकानन्तरं प्रसिद्धं प्रामाण्यवादव्याख्यानं भवति रघुनाथशिरोमणेः दीधितिनामकम्। दीधितेः व्याख्यानं श्रीगदाधरभट्टाचार्यैः विरचितम्। गदाधरभट्टाचार्यैः प्रामाण्यवादस्य पञ्चसु विप्रतिपत्तिषु तृतीयां विप्रतिपत्तिं विहाय अन्यासां विवरणं व्यरचि। मथुरानाथतर्कवागीशैः प्रामाण्यवादचिन्तामणेः व्याख्यानं कृतम्।

भट्टाचार्यविरचिता दीधितिटीका अतितरां प्रसिद्धा सरला च। तथापि भट्टाचार्यरचितग्रन्थान्तरापेक्षया अस्याः टीकाया काठिन्यं विद्यत एव। अत एवोच्यते 'नमः प्रामाण्यवादाय मत्कवित्वापहारिणे' इतिं। श्रूयते च 'भट्टाचार्यैः प्रप्रथमं प्रणीतत्वात् ग्रन्थोऽयं कठिनतरो भवतीति'।

भट्टाचार्यग्रन्थेषु इदं वैशिष्ट्यं यत् दुरूहानां गुरुमतीयप्रमेयाणां सम्यगाकलनमत्र व्यधायि। तथैव मुरारिमिश्रमतानुवादः भट्टमतानुवादश्च निगूढतत्त्वाकलनपूर्वकं कृतौ वर्तेते। मध्ये पक्षधरमिश्राणां व्याख्यानमपि अनूदितं परिशीलितं च। एवमेव प्राचीनग्रन्थान्तराणि च परामृष्टानि। तत्र तत्र विप्रतिपत्तिघटकदलसार्थक्यं च तत्तन्मीमांसकमतानुरोधेन विधाय विचारः युक्तिप्रत्युक्ति परंपरया वर्धितः, येन प्रेक्षावतां बुद्धिवैशद्यं जायेत। एवं च गदाधरीयमिदं विवरणमुत्कृष्टं वरीवर्ति।

प्रकृतग्रन्थपरिचयः

(श्रीमद्भिः किरीटिवेङ्कटाचार्यैः विरचितोऽयं प्रामाण्यवादखण्डनाभिधानो ग्रन्थः गदाधरभट्टाचार्यविरचितस्य प्रामाण्यवादस्य परिशीलनात्मकः। अयं ग्रन्थः श्लोकव्याख्यारूपः मूलश्लोकाः दशसंख्याका लभ्यन्ते। केन रचिता इति न ज्ञायते। प्रथम श्लोकः 'परमकरुणायोगयोगी जगद्दुरितोपगम्.........प्रवृत्त्युपपत्तये' इति अत्र मातृकायां योगयोगेत्येव वर्तते। अस्माभिः व्याख्यानानुसारेण योगीति परिवर्तनमकारि। एते च ग्रन्थकाराः प्रथमद्वितीयविप्रतिपत्तौ तत्र तत्र भट्टाचार्यविवरणं क्वचिच्च दीधितिमपि अनूद्य खण्डयन्ति। स्थालीपुलाकन्यायेन कानिचित् स्थलानि प्रदर्श्यन्ते-।

तत्त्वचिन्तामणिग्रन्थः निःश्रेयससाधनम् निःश्रेयससाधनार्थप्रतिपत्तिजनकत्वात् इति अनुमानं भट्टाचार्येष्टम्। एतैः अर्थे निःश्रेयससाधनत्वमित्यनेन स्वावधारणनिष्ठनिःश्रेयससाधनतानिरूपितविषयिता-सम्बन्धावच्छिन्नावच्छेदकतापर्याप्त्यवच्छेदकषोडशत्वपर्याप्त्यधि-करणत्वं वा निःश्रेयससाधनावधारणविषयत्वं वा विवक्षितम् इति विकल्प्य प्रथमे स्वरूपासिद्धिः, द्वितीये घटोऽस्तीति वाक्येऽतिव्याप्तिरित्युक्तम्।

एवं 'पर्याप्तिनिवेशने तदर्थपर्यालोचने च गौरवम्' इत्याहुः भट्टाचार्याः। यद्व्यतिरेकज्ञानत्वेन प्रतिबन्धकता इत्यत्र तृतीयायाः स्वरूपसम्बन्धरूपावच्छेदकत्वार्थकत्वमुक्त्वा तस्य पर्याप्तिनिवेशे गौरवम् इति अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशः कार्य इति तेषामाशयः। एतैस्तु अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य तृतीयार्थत्वे तृतीयायाः लाक्षणिकत्वप्रसङ्गदोष उक्तः। अनतिरिक्तवृत्तित्वनिवेशपक्षेऽपि अनेकपर्याप्तिघटनं कार्यमिति तत्पक्ष एव गुरुभूत इति च प्रत्यपादि। टिप्पण्यामयमंशो विवृतश्च।)

एवं तज्ज्ञानवृत्तिघटत्ववद्विशेष्यकघटत्वप्रकारकत्वम् तद प्रामाण्याग्राहकस्वाश्रयग्राहकसामग्रीजन्यग्रहनिष्ठात्यन्ताभावप्रतियोगिता-निरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतापर्याप्त्यनधिकरणं वा न वेति विप्रतिपत्तिपरिष्कारः भट्टाचार्यैः गुरुमते व्यवसायस्य प्रमात्वाधिकरणत्वात् तदधिकरणत्वमादायार्थान्तरं स्यादिति खण्डितम्। एतैस्तु तादृशार्थान्तरावकाशो नास्तीति निरूप्यते। अधिकरणविषयिता-स्वरूपयोः भेदात् तत्तन्निरूपितत्वमपि परस्परं भिन्नमिति विषयित्वीय-विलक्षणनिरूपितत्वसम्बन्धवच्छिन्नतादृशग्रहनिष्ठात्यन्ताभाव प्रतियोगितावच्छेदकत्वाभावरूपसाध्यस्य स्वीकारे नार्थान्तरापत्तिरिति तदाशयः।

एवम् अप्रामाण्यं प्रामाण्यविरोधीतिदीधितिविवरणवेलायां बहुविचारं विधाय 'घटत्ववतिघटत्वपप्रकारकत्वावच्छेककानवच्छिन्न-त्वावच्छिन्नत्वोभयाभाववत्तद्वद्वृत्त्यधिकरणतासामान्ये यन्निरूपितत्व, यत्सम्बन्धावच्छिन्नत्त्वोभयाभावः, तत्सम्बन्धावच्छिन्नतन्निष्ठस्वाश्रय-विशेष्यतानिरूपितप्रकारताकग्रहाजनकत्वम् इति अप्रामाण्याग्राहकत्व-दलार्थनिष्कर्षः कृतः। तत्र हि गादाधर्यामुक्तस्य प्रमात्वविरोधित्व परिष्कारस्योपरि संभाविता दोषाः प्रस्तुताः, ततश्च तेषां सर्वेषां वारणाय सम्पूर्णस्याप्रामाण्याग्राहकत्वदलस्यैवं परिष्कारः कृतः। अत्र प्रमात्वज्ञानत्वप्रभृति-प्रमात्वाविरोधिधर्माणां व्युदासः, प्रामाण्यविरोधिनां भ्रमत्वप्रमात्वाभावघटत्वादीनां च संग्रहश्च सम्यक् प्रतिपादितः।

अपि च गुरुमते विभिन्नज्ञानगोचरयोरपि धर्मधर्मिणोः विशेषणविशेष्यभावः स्वीक्रियत इति गदाधरभट्टाचार्यैः कथितम्। तथैव अन्यैः शास्त्रकारैः गुरुमतमनूद्यते। एते च ग्रन्थकाराः विभिन्नज्ञानीय-विषयतयोः निरूप्यनिरूपकभावो नास्तीति प्रतिपादयन्ति। अयं

विशेषणविशेष्यभावो वास्तविको वा वैज्ञानिको वेति विकल्प्य दूषयन्ति। अयं नूतनविषयः ग्रन्थान्तरेषु न दृश्यते।

अपि च 'इदं ज्ञानमप्रमेति व्यवहारजनको ग्रहः। स च मिश्रादिमते विशिष्टज्ञानम्। गुरूणां तु स्वातन्त्र्येणोपस्थिताप्रामाण्यस्य धर्मिज्ञानम्' इति दीधितिग्रन्थः ग्रन्थकृद्भिरेतैः विवृतः। भट्टाचार्यैः 'उपस्थितौ अप्रामाण्यस्य' इति पाठ आदृतः। एतैस्तु उपस्थितमप्रामाण्यं येन सः, तस्येति बहुव्रीहिसमासः समाश्रितः। अयमपि नूतनोविषय इति वक्तुं शक्यते। अत्र ग्रन्थे केचन प्रमेयविशेषा अपि शिक्षिता भवन्ति।

"अत्रोच्यते" इत्यादिना घटव्यवसायस्य स्वप्रकाशत्ववादेऽपि व्यवसायेनघटत्ववतिघटत्वप्रकारकत्वरूपप्रामाण्यमेव गृह्यते, न तु ज्ञानत्ववति ज्ञानत्वप्रकारकत्वमपि। तन्निष्ठानां सर्वेषां तद्ग्राह्यत्वेऽनवथाप्रसङ्गोऽप्युक्तः। एवं मिश्रमतेऽपि अनुव्यवसायानुव्यवसायेन ज्ञानत्ववति ज्ञानत्वप्रकारकत्वादिकमेव गृह्यते, न तु आत्मत्ववति आत्मत्वप्रकारकत्वमपि तस्य मामहं जानामीति - अनुव्यवसायान्तरणैव तस्य ग्राह्यत्वमित्युक्तम्।

परन्तु भट्टमते अहं ज्ञानवान् इत्येवात्मपक्षकानुमितिरिति कथितम्। तत्तु चिन्तनीयमेव।

किञ्च 'तन्मते घटमुख्यविशेष्यकज्ञानस्य शशशृङ्गतुल्यत्वात्' इति गुरुमते विषयमुख्यविशेष्यकं ज्ञानं नास्तीति कथितम्। तत्तु चिन्त्यम् - गुरुमते 'अयं घटः घटमहं जानामीति' व्यवसायस्य शास्त्रकारैः सिद्धान्तितत्वात् एतत् कथमिति शङ्कासंभवात्।

अपि च द्वितीयविप्रतिपत्तिविचारे मुरारिमिश्रमते विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वानङ्गीकारेऽपि प्राथमिकं ज्ञानज्ञानं तद्विशेषणकत्वेन स्वीकृतमपि नैयायिकैः ज्ञानविशेष्यकत्वेन स्वीकारात् तज्ज्ञानविषयक-

ज्ञानजन्यत्वेन नैयायिकसिद्धभिन्नतद्ग्राह्यत्वमादाय साध्यवत्त्वं संभवतीति भट्टाचार्योक्तं विमृष्टम् । तथाहि - 'विशेषणज्ञानस्थानापत्तिमात्रेण यथोक्तसाध्यवत्त्वोपपादने यों यद्धर्मवद्विशेष्यकयत्प्रकारकेच्छावान् स तद्धर्मवद्विशेष्यकतत्प्रकारकज्ञानवान् इत्यादि घटत्वादीतरकिञ्चिद्धर्म-घटितसामान्यव्याप्तिग्रहसहकृतात् घटेच्छावान् चैत्र इति पक्षधर्मताज्ञानात् विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेन जनितायाः घटप्रमावान् चैत्रः इत्याद्यनुमितेरवारणादर्थान्तरस्य दुष्परिहरत्वापातात्' इति ग्रन्थेन मुरारिमिश्रमतेऽर्थान्तरं द्रढयन्ति एते ग्रन्थकाराः ।

एवमादयः विशेषाः एतद्ग्रन्थे विद्यमानाः विदुषां परामर्शं नितरामर्हन्ति । अत्र श्लोकरूपेण परिष्कारलेखनमपि विशेषः । यथा द्वितीयविप्रतिपत्तौ विधिकोटिरेवं संगृहीता वर्तते।

'तज्ज्ञानज्ञानवतोऽन्यत्वेनन्यायवित्प्रसिद्धस्य ।
ग्राह्यं नान्त्यं ज्ञानं प्रतियोगि प्रागभावस्य ॥' इति ।

प्रकृतग्रन्थकर्तृपरिचयः

एतस्य ग्रन्थस्य रचयितारः श्रीमन्तः किरीटिवेङ्कटाचार्याः अष्टादशशतके क्रैस्तवीये श्रीवैष्णवकुले जनिमलभन्त । विश्वप्रसिद्धे श्रीशैलवंशे लब्धजन्मान इमे परंपरागतशास्त्रसम्पत्तिमन्तोऽभूवन् । एतेषां कुलस्य क्षेत्रमासीत् सुरपुरमिति कर्णाटान्ध्रव्यतिकरविशेषभाक् कश्चन ग्रामविशेषः । श्रूयते यत् एतेषां परंपरायामविच्छेदेन सप्तपर्वसु तार्किकाः वेदान्तिनश्च परवादिदन्तिभञ्जकसिंहा व्यलसन् इति । किमु वक्तव्यम् ? विशिष्टाद्वैतवेदान्तग्रन्थेषु श्रीमद्वेदान्तदेशिकग्रन्थेभ्योऽर्वाचीना बहवो ग्रन्था एतत्परम्परया लिखिता एव । एतेषां कुलस्य बुक्कपट्टणं वंश इत्यपि ख्यातिरासीत् ।

एतेच श्रीनिवासाचार्याणां पुत्राः अण्णयाचार्याणां ज्येष्ठभ्रातरश्चासन्। एतेषां भ्रातरः, पितरश्च पण्डिताग्रेसराः ग्रन्थनिर्मातारश्च ।

एतेषां कृतयः - (१) आनन्दतारतम्यखण्डनम् - इयं कृतिः मोक्षे मुक्तानां परस्परं आनन्दतारतम्यं नास्तीति प्रतिपादयति। (२) ब्रह्मसूत्रभाष्यार्थपूर्वपक्षसंग्रहकारिका-इति द्वितीया कृतिः श्रीभाष्यस्थ जिज्ञासाधिकरणेऽद्वैतिनां सिद्धान्तस्य योऽनुवादः, तं कारिकारूपेण संगृह्णाति । (३) प्रपञ्चमिथ्यात्वानुमानखण्डनम् इति ग्रन्थः प्रपञ्चः मिथ्या दृश्यत्वादित्यादि - अनुमानपरिशीलनात्मकः। (४) विशिष्टाद्वैतसिद्धान्त प्रमेयनिरूपणपरः सिद्धान्तवैजयन्तीतिग्रन्थः। एवमन्या अपि एतेषां कृतयः न्याये, साहित्ये च विलसन्ति।

प्रकृतमातृकालाभः

अस्य ग्रन्थस्य तालपत्रमयी मातृका चेन्नै अडयार् ग्रन्थालये वर्तते। तस्मात् छायाग्रहणमाध्यमेन लब्धोऽयं ग्रन्थः। अडयार् ग्रन्थालयः - सं. ५१५८४ इति अस्य संकेतः।

अस्य परिष्करणाय भूयान् प्रयत्नः कार्य आसीत्, यतः आन्ध्रलिप्यां वर्तमानस्यास्य ग्रन्थस्य यथावदर्थावधारणं बहुक्लेशसाध्यं अभूत्। तत्र तत्र लेखकप्रमादेन दोषाः समभवन्। अस्माभिः यथामति परिशोध्य बहुत्र पाठमूहित्वा प्रकाशनं व्यधायि । अत्र स्खलनं भवति चेत् क्षन्तव्योऽयं संपादक इति प्रार्थये।

अस्य प्रकाशनस्य प्रेरकाः प्राच्यप्रतीच्यादिसर्वविद्यानिष्णाताः अस्मत्कुलाधिपतयः विदितवेदितव्याः डा. वि.आर्.पञ्चमुखी-महाभागाः तेषां कृते धन्यवादान् निवेदयामि।

अस्मत्कुलपतिमहाशयाः कुशाग्रधिषणाः विचक्षणाग्रेसराः विलक्षणपाण्डित्यमण्डिताः आचार्याः प्रह्लादाचार्यमहाशयाः। तेषां

निरन्तरप्रोत्साहनमस्य ग्रन्थस्य प्रकाशने निदानम् इति तेभ्यो नमोवाकपूर्वकं कृतज्ञतां निवेदयामि।

अस्मत्कुलसचिवमहोदयानां सरससाहितीधुरीणानां आचार्य लक्ष्मीनरसिंहभट्टानां कृते कार्तज्ञ्यं सप्रश्रयं निवेदयामि, येषां चानुकम्पा अस्माकं बहुसहायिकाभूत्।

अस्य मुद्रणोपयोगि बहुकार्यं ग्रन्थस्य प्रापणमान्ध्रलिप्यां वर्तमानस्य मूलस्य पठनं तथा महतोत्साहेन कार्यप्रवर्तनमित्यादिकमस्मत्सविधे शास्त्रमधीयानेन श्रीमता रावुपाह्वेण गुन्नेश्वरेण विहितम्। ममानुजः घनपाठी न्यायादिशास्त्रेषु कृतबहुपरिश्रमः चि.के.ई.मधुसूदनः पाठशोधने, टिप्पणीलेखने च साह्यमाचरत्। एवं श्रीमोहनपाटीलः प्रथमं सम्पूर्णटङ्कणं व्यधात्। एतेभ्यः सर्वेभ्यः श्रेयःपरम्परां भगवान् श्रियःपतिः वितरतु इति प्रार्थ्यये।

अन्ते च अस्मद्गुरुवरान् सर्वान्, मातापितरौ चाभिवन्द्य ग्रन्थमिमं विद्वद्भ्यः समर्पयामि।

इत्थं विद्वज्जनविधेयः

का.इ.देवनाथः

श्रीः

श्रीविद्याहयग्रीवाय नमः ॥

श्री गरुडाय नमः ॥

श्रीमते वेदान्तगुरवे नमः ॥

प्रामाण्यवादखण्डनम्

प्रथमविप्रतिपत्तिः

तत्र तावत् स्वग्रन्थे प्रेक्षावतां प्रवृत्तये फलवदान्वीक्षिकी-प्रतिपादितार्थप्रतिपादकत्वेन हेतुना फलवत्तां प्रतिपिपादयिषुरान्वीक्षिक्याः फलमुपपादयति ।

परमकरुणायोगयोगीजगद्दुरितोपगं
समवितुमना विद्यास्वष्टादशस्वभिपूजितम् ।
व्यवृणुत महातर्कं तत्र प्रमाणमुखार्थवित्
भजति परिमित्यूचे प्राज्ञप्रवृत्त्युपपत्तये ॥ १ ॥

प्रथमश्लोकार्थविवरणम्

दुरितोपगं जगत् संसार्यात्मवर्गं समवितुमनाः सम्यग् रक्षितुं मनो यस्य तथोक्तः, तुम्काममनसोरपि [१] (महाभाष्यम्) इति मकारलोपः। रक्षाच इष्टप्रतिपादनम् । तस्य सम्यकृता अनिष्टनिवृत्तिपूर्वकत्वं । ननु सर्वः स्वार्थं समीहत इति न्यायेन गौतमस्य मुनेः जगद्रक्षणेच्छायां किं निमित्तमतः आह- । परमेति परदुःखप्रहाणेच्छा करुणा, तस्याः पारम्यं स्वार्थानपेक्षत्वं, सैव निमित्तमिति भावः। ननु करुणोत्पत्तेः परसमवेतदुःखतत्सामग्र्यादि

॥ श्रीः ॥

१. तुम्काममनसोरपीति - 'लुम्पेदवश्यमः कृत्ये तुम्काममनसोरपि' इति महाभाष्य-वचनम् ।

ज्ञानापेक्षत्वात् तज्ज्ञानं गौतमस्य कथमित्यतः तं विशिनष्टि। योगेति। योगजधर्मजन्यसाक्षात्कारे जगद्दुरितादिभानात् सर्वं घटते इति भावः। यद्यपि गौतम इति विशेष्यवाचकपदम् इह नास्ति। तथापि आन्वीक्षिकीप्रसङ्गात् स एव मुनिरिह प्रतीयत इति न वाक्यार्थापूर्तिरिति भावः। **महातर्कम् -**

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेदनेतरः॥

इति स्मृतिप्रतीतमहिमानं न्यायं, महिमानमेनं व्यञ्जयितुं पुनः विशिनष्टि। **विद्यास्वित्यादिना**

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥

आयुर्वेदो धनुर्वेदो गान्धर्वं चार्थशास्त्रकम्।
इति विद्याश्चतस्त्रस्तु विद्या ह्यष्टादश स्मृताः॥

इति परिगणितेषु विद्यास्थानेषु सर्वशास्त्रोपकारकत्वेन अभिपूजितस्तर्क इति भावः। **व्यवृणुत** - व्याख्यातवान्। **तत्र** - आन्वीक्षिक्याम्। सप्तम्यर्थः उपादानता प्रवृत्त्यन्विता। **प्रमाणमुखार्थवित्** - प्रमाणादिषोडश-पदार्थतत्वज्ञः परं सर्वोत्कृष्टपुरुषार्थं मोक्षं भजति - प्राप्नोति इत्यूचे - इति सूत्रेण प्रतिपादितवान् इत्यर्थः। तथा च आन्वीक्षिक्युपादानकप्रवृत्ति निर्वाहायान्वीक्षिकीविशेष्यकमुक्तिरूपनिःश्रेयससाधनताज्ञानं सूत्रेणोत् पादितावान् इति भावः। ननु तावत् स्वग्रन्थे प्राज्ञप्रवृत्तौ किमायातमत आह।

प्रमाणमूलिका यतः समस्तवस्तुसिद्धयः।
भवन्त्यतः प्रमाणतत्वमत्र संविविच्यते॥ २॥

द्वितीयश्लोकार्थविवरणम्

अत्र स्वीयप्रमाणग्रन्थे । **प्रमाणतत्त्वम्** । प्रमाणपदार्थः । **संविविच्यते** । सम्यङ्निरूप्यते । लक्षणस्वरूपप्रामाण्यादिप्रकारक-वर्तमाननिरूपणविषयः प्रमाणतत्वम् इति यावत् । पदार्थषोडशक-मध्येऽस्यैव निरूपणे हेतुमाह **प्रमाणेत्यारभ्य भवन्तीत्यन्तेन**। सर्वसिद्धि-प्रयोजकज्ञानविषयत्वात् इत्यर्थः । तथा च आन्वीक्षिकीप्रतिपादितार्थ-प्रतिपादकत्वात् तत्फलेन एव ग्रन्थस्य फलवत्त्वं इति तत्रेव अत्रापि प्रेक्षावतां प्रवृत्तिरुपपद्यत इति भावः ।

ननु न तत्र प्रतिपादितार्थप्रतिपादकत्वं तत्फलकत्वव्याप्यम् । घटोस्ति इत्यादिवाक्यस्याप्यान्वीक्षिकीप्रतिपादितार्थप्रतिपादकत्वात्तस्य निःश्रेयससाधनत्वाभावात् व्यभिचारात् । अपि तु तत्प्रतिपादितयावदर्थ-प्रतिपादकत्वम् । तच्च न स्वग्रन्थ इति चेत् । मैवम् । [२]सर्ववस्तुतत्त्वाव-धारणस्यापि प्रमाणतत्त्वावधारणाधीनतया प्रेक्षावतां प्रमाणतत्त्वावधारणे सिद्धे सर्वतत्त्वावधारणमप्येतन्मूलकं नान्तरीयकतया सिद्ध्यति इति स्वग्रन्थस्यापि तादृशान्वीक्षिकीजन्यप्रतिपत्तिविषयता व्यापकस्वप्रयोज्य-प्रतिपत्तिविषयताकत्वं तत्फलकत्वव्याप्यं सिद्ध्यति इति तात्पर्यात् । सर्ववस्तुसिद्धीनां प्रमाणमूलकत्वकथनस्याप्यत्रार्थे अनुकूलत्वात् ।

फलवच्छास्त्रोपकरणत्वेनेति दीधितिविवरणविचारः

यत्तु - [३]फलवदान्वीक्षिकीप्रतिपाद्यार्थसमुदायैकदेश प्रतिपादकत्वे-

---

२. सर्ववस्तुतंत्त्वावधारणस्यापि इति - आन्वीक्षिकीप्रतिपाद्ययावदर्थप्रतिपादकत्वम् तत्त्वचिन्तामणिग्रन्थस्य नास्तीति पूर्वपक्षे सति उच्यते। तादृशान्वीक्षिकीजन्यप्रतिपत्तिविषयता यत्र यत्र वर्तते तत्र सर्वत्रापि साक्षात्परंपरया वा तत्त्वचिन्तामणिजन्यप्रतिपत्तिविषयता वर्तत इति भावः । प्रमाणतत्त्वप्रतिपत्तिः साक्षात् प्रकृतग्रन्थप्रयोज्या, अन्यपदार्थानां प्रतिपत्तिः परंपरया तत्प्रयोज्येत्यर्थः।

३. प्रामाण्यवादः -पृ.सं.३

नेत्यर्थवर्णनं गदाधरभट्टाचार्यैः कृतम् । तन्न[४] । उक्तदोषात्[५] । फलवत् सन्निधानेऽफलं तदङ्गमिति न्यायेन निष्फलत्वसाधकत्वाच्च । अस्य तदुपकरणत्वे लुप्तदोषदीक्षणीयादिकिंचिदङ्गकस्य ज्योतिष्टोमस्य स्वर्ग-साधनत्वाभाववदुप[६]करणरहितायाः आन्वीक्षिक्याः निःश्रेयस साधनत्वाभावप्रसङ्गाच्च । सूत्रात्मकप्रमाणग्रन्थरूपोपकरणसत्वेन तस्य एतदनपेक्षत्वात् एतस्योपकरणत्वे तदानर्थक्यप्रसङ्गाच्च ।

यदि [७]स्वग्रन्थस्य निःश्रेयससाधनत्वानुमितौ निरुक्तार्थ-प्रतिपादकत्वस्य निःश्रेयससाधनार्थप्रतिपत्तिजनकतात्वेनैव हेतुता तथाविधार्थे आन्वीक्षिकीप्रतिपाद्यसमुदायान्तर्गतत्वकथनं तु तस्यां सहचारज्ञानेन व्याप्तिग्रहार्थमिति तैरेव परिष्कृतम् । तदप्यत एवानिरस्तम् । अर्थे निःश्रेयससाधनत्वस्य स्वावधारणनिष्ठनिःश्रेयससाधनतानिरूपित विषयितासम्बन्धावच्छिन्नावच्छेदकतापर्याप्त्यवछेदकषोडशत्वात्मक व्यासज्यवृत्तिधर्मपर्याप्त्याधिकरणत्वरूपस्य विवक्षणे चिन्तामणिग्रन्थ-जन्यप्रतिपत्तिविषये प्रमाणतत्वमात्रे[८] तदभावेन हेतोः स्वरूपासिद्धेः । निःश्रेयससाधनावधारणविषयत्वमात्ररूपस्य विवक्षणे च घटोस्तीत्यादि-

---

४. उक्तदोषादिति - निःश्रेयसफलवदान्वीक्षिकीप्रतिपाद्यार्थसमुदायैकदेशप्रतिपादकत्वं घटोऽस्तीति वाक्येऽपि वर्तत इति व्यभिचाराख्यो हेतुदोषोऽत्र विवक्षितः ।

५. फलवत्सन्निधौ अफलं तदङ्गमिति न्यायः - स्वर्गफलकस्य दर्शपूर्णमासयागस्य सन्निधौ (प्रकरणे) पठितं प्रयाजादि अफलं तदङ्गमिति दृष्टान्ते समन्वयः।

६. उपकरणरहिताया इति - तत्त्वचिन्तामणिग्रन्थस्य आन्वीक्षिकी-उपकरणत्वे तद्ग्रन्थं विना न्यायशास्त्रस्य मोक्षसाधनत्वाभावप्रसङ्गइत्यर्थः।

७. प्र.वा-पृ.सं.३

८. प्रमाणतत्वमात्रे तदभावेनेति - स्वावधारणनिष्ठनिःश्रेयससाधनतानिरूपिता विषयितासम्बन्धावच्छिन्नावच्छेदकता अर्थे वर्तते । तत्पर्याप्त्यवच्छेदकस्य षोडशत्वस्य पर्याप्तिसम्बन्धेनाधिकरणं प्रमाणतत्त्वमात्रं न भवति ।

वाक्यातिप्रसङ्गस्य दुरपह्नवत्वात् । तस्मात् अस्मदुक्तपद्धतिरेव बुद्धिमद्भिरादरणीया।

[१]मूले प्रमाणतत्त्वमत्र विविच्यत इति प्रतिज्ञाय प्रमाणादीनां तत्त्वं प्रतिपादयच्छास्त्रं परम्परया निःश्रेयसेन सम्बध्यत इति न युक्तम्। प्रमाणादिं तत्त्वावधारणस्याशक्यत्वात् । तद्धि प्रमातत्त्वावधारणाधीनं तच्च स्वतः परतश्च न सम्भवति वक्ष्यमाणदूषणगणग्रासादित्याक्षिप्तम् । तस्य अयं अभिप्रायः । शास्त्रधर्मिकस्वसमीहितसाधनताज्ञाने प्रमात्वावधारणात् शास्त्रोपादानकप्रवृत्तौ सत्त्याम् मननादिद्वारा शास्त्रतः पदार्थतत्त्वावधारणान्निःश्रेयसं भवति प्रवृत्तस्य पुंस इत्यविवादम् । तथाच शास्त्रोपादानकप्रवृत्तिजनकप्रमात्वावधारणाधीनपदार्थतत्त्वावधारणसाध्ये सति निःश्रेयसे यदि प्रमात्वावधारणं अशक्यम् आपतस्यत तदा पदार्थसार्थस्यापि दुर्निर्धारणता समपत्स्यत । अतः शास्त्रस्य निःश्रेयससम्बन्धो दूरादपास्त इति। तदेतत् संगृह्णाति ।

शास्त्रस्येष्टोपयोगग्रहविषयिकया तत्प्रमात्वाधृत्या
सत्यां शास्त्रे प्रवृत्त्यां भवति मतिमतां सर्वतत्त्वावधारः ।
दुर्निर्धारं प्रमात्वं प्रथमत उचितं न स्वतो नान्यतोवे
त्यन्योन्यंवादिवर्गप्रकथितबलवद्दूषणोन्मेषणेन ।। ३ ।।

तृतीयश्लोकार्थविवरणम्

शास्त्रस्य इष्टोपयोगग्रहः - शास्त्रधर्मिकेष्टसाधनताज्ञानम् । तद्विषयिकया तद्विशेष्यिकया। तत्प्रमात्वस्य। तादृशेष्टसाधनताज्ञानसम्बन्धिनः इष्टसाधनत्ववति तत्प्रकारकत्वस्य अवधृत्या - अवधारणेन। अवधारः । अवधारणम् । प्रथमतउचितं - ग्राह्यतया प्रथमप्रस्तुतम् । दुर्निर्धारम् । निश्चेतुं अशक्यम्। केन हेतुनेत्याशङ्कयामाह - न स्वत

१. प्र.वा-पृ.सं.६

इत्यादिना । न स्वत इति नैयायिकैः नान्यत इति मीमांसकैः परस्परकथितदूषणग्रासेनेत्यर्थः । शङ्कते -

अथ किमिह नः प्रामाण्यज्ञप्तितो नहि युज्यते
व्यभिचरणतः सर्वास्वेव प्रवृत्तिषु हेतुता ।
न च जनकता निष्कम्पायामवश्यमपेक्षितात्
भवति खलु सा यस्मादर्थावधारणमात्रतः ॥ ४ ॥

चतुर्थश्लोकविवरणम्

इह शास्त्रधर्मिकेष्टसाधनताज्ञाने। **प्रामाण्यज्ञप्तितः**-प्रामाण्यज्ञानेन । **किं नः** किं फलमस्माकम् । तन्नापेक्षितं इति भावः ।

ननु शास्त्रे प्रवृत्त्यर्थमपेक्ष्यतां इत्याशङ्क्य तद्धर्मिकेष्टसाधनताज्ञाने प्रमात्वनिश्चयस्य तदुपादानकप्रवृत्तिमात्रे हेतुता, तदुपादानकनिष्कम्पप्रवृत्तौ वा । नाद्य, व्यभिचारात् । नद्वितीयः - अर्थावधारणेनान्यथासिद्धेरिति खण्डयन् शङ्कां उपपादयति । न हीत्यादिना । **व्यभिचरणतः** - व्यभिचारात् । प्रवर्तकज्ञाने प्रमात्वनिश्चयमन्तरेणापि सकम्पप्रवृत्तिदर्शनात् । **सर्वास्वेव प्रवृत्तिषु** - प्रवृत्तिसामान्ये तदुपादानकप्रवृत्तित्वावच्छिन्न इति यावत् । हेतुता । तद्धर्मिकेष्टसाधनताज्ञानप्रमात्वावधारणस्येति प्रकरणाल्लभ्यते । न हि युज्यत इति पूर्वेणान्वयः । **निष्कम्पायाम्** इति प्रवृत्ताविति सम्बन्ध्यते । जनकता न च युज्यत इत्यनुषङ्गेणान्वयः । **सा खलु** - निष्कम्पप्रवृत्तिरपि । **अवश्यम् अपेक्षितात्** - आवश्यकतया क्लृप्तात् । **अर्थावधारणमात्रतः** तन्मात्रात् यस्माद्धेतोर्भवति तस्मात्कारणात् निष्कम्पप्रवृत्तावपि न तस्य हेतुत्वमिति भावः ।

यत्तु - प्रमाकरणत्वप्रकारकप्रमाणतत्त्वावधारणस्य विशेष्यतावच्छेदकतद्वतितत्प्रकारकत्वलक्षणप्रमात्वावधारणाधीनत्वात् तस्य च स्वतः परतश्चासम्भवात् प्रमाणतत्त्वं दुरवधारणमित्यर्थवर्णनं चिन्तामणि-

ग्रन्थस्य कृतम्। तन्न। तथासति अथ किं प्रामाण्यज्ञानेन प्रवृत्तिमात्रेतस्य व्यभिचारित्वादित्युत्तरग्रन्थस्य असंगतिप्रसङ्गात्। प्रमाणत्वावधारणस्य विशेषणतावच्छेदकप्रकारकनिर्णयविधया अपेक्षायाः प्रागुक्तत्वेऽपि प्रवर्तकतया तदपेक्षाया अनुक्तत्वात्। प्रवृत्तिकारणत्वं तु लाघवात् तद्वतितत्प्रकारज्ञानस्यैवेत्यस्मदुक्त[१०]रीत्या व्याख्यानमेव न्यायप्रवणान्तःकरणैः शरणीकरणीयम्।

यस्य संशयव्यतिरेकनिश्चयौ – इति नियमविचारः

ननु निष्कम्पप्रवृत्तिः स्वविषयविषयकेष्टसाधनताज्ञाननिष्ठ तज्ज्ञानत्वावच्छिन्नविशेष्यताकप्रमात्वप्रकारकनिश्चयत्वावच्छिन्न जनकतानिरूपितजन्यतावती तज्ज्ञानत्वावच्छिन्नविशेष्यक प्रमात्वव्यतिरेकत्वावच्छिन्नप्रकारताकज्ञानत्वावच्छिन्नप्रतिबन्धकता-कत्वात्, यत् यद्धर्मावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रतियोगिताक-व्यतिरेकत्वावच्छिन्नप्रकारताकज्ञानत्वावच्छिन्नप्रतिबन्धकताकम् तत् तद्धर्मावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारताकनिश्चयत्वावच्छिन्न जनकतानिरूपितजन्यतावत् यथा धूमत्वावच्छिन्नविशेष्यक वह्न्यव्यभिचारव्यतिरेकप्रकारताकज्ञानत्वावच्छिन्नप्रतिबन्धताकं धूमत्वावच्छिन्नविशेष्यकवह्न्यव्यभिचारत्वावच्छिन्नप्रकारताक निश्चयत्वावच्छिन्नजनकताकं अनुमित्यात्मकं ज्ञानं इत्यनुमानेन निष्कम्पप्रवृत्तौ प्रमात्वज्ञानजन्यत्वं सिद्ध्यतीति प्रवृत्तौ

---

१०. अस्मदुक्तरीत्येति – शास्त्रोपादानकप्रवृत्तिं प्रति प्रमात्वावधारणं कारणम्। तदधीन पदार्थतत्त्वावधारणसाध्ये सति निःश्रेयसे यदि प्रमात्वावधारणं अशक्यमापत्स्यत, तदा पदार्थानामपि दुर्निर्धारणता समपत्स्यत। अतः शास्त्रस्य निःश्रेयससम्बन्धो दूरापास्तः इति रीत्या व्याख्यानमित्यर्थः।

प्रमात्वज्ञानापेक्षावश्यकी । [११]अत्र ईश्वरप्रमात्वज्ञानजन्यत्वं आदाय सिद्धसाधनवारणाय साध्ये निश्चयत्वावच्छिन्नत्वनिवेशः हेतौ च प्रतिबन्धकतायां अवच्छिन्नत्वं व्यापकत्वं, तेन तद्वत्ताज्ञानं प्रति तदभावनिश्चयत्वेन प्रतिबन्धकत्वात् तादृशनिश्चयत्वघटक व्यतिरेकज्ञानत्वनिष्ठस्वरूपसम्बन्धरूपावच्छेदकताकत्वेपि संशये तद्व्यतिरेकज्ञानत्वसत्वेन तद्व्यापकत्वाभावात् न तद्वत्तानिश्चयाजन्ये तद्वत्ताज्ञाने व्यभिचारः। तत्पर्याप्त्यवच्छेदकताकत्वं वा विवक्षणीयं। तथा च प्रवृत्तौ प्रमात्वधीरपेक्ष्यतां इति अन्तराक्षिप्य परिहरति।

यत्राशु प्रतिबन्धिका भवति यस्याभावधीः कात्स्न्र्यत
स्तस्मिंस्तस्य विनिश्चयो जनक इत्युक्तिश्च निर्युक्तिका।
तत्संदेहवतोर्थ संशयवशात् अर्थावधृत्यत्ययात्
नारम्भो भवितेति तत्र न हि सा सर्वा प्रतिद्वन्द्विनी ।। ५ ।।

पञ्चमश्लोकविवरणम्

यस्य संशयव्यतिरेकनिश्चयौ यत् प्रतिबन्धकौ तन्निश्चयस्तद्धेतु रनुमितौ व्याप्तेरेवेति [१२]मूलम् । तत्र घटादिव्यतिरेकनिश्चयप्रतिबध्ये घटनिश्चये व्यभिचारात् संशयपदोपादानम्[१३] । व्यभिचारसंशयप्रतिबध्ये व्यभिचारनिश्चयाजन्येऽनुमितिज्ञाने व्यभिचार इति व्यतिरेकनिश्चय-पदोपादानमिति[१४] प्राञ्चः । संशयत्वं च प्रकारतानिरूपकविशेष्यता-निरूपिताभावप्रकारताशालिज्ञानत्वं संशयपदार्थतावच्छेदकम् । घटस्य

---

११. सिद्धसाधनवारणाय - तथा च ईश्वरज्ञानस्य उपादानगोचरापरोक्षज्ञानत्वेनैव जनकत्वात् तदवच्छेदककाटौ निश्चयत्वप्रवेशात् न सिद्धसाधनमित्याशयः।

१२. प्र.वा-पृ.सं.७

१३. प्र.वा-पृ.सं ८

१४. प्र.वा-पृ.सं ८

संशय इत्यत्र घटनिष्ठ प्रकारतानिरूपितविशेष्यतानिरूपकघटाभाव-प्रकारताशालिज्ञानमिति अनुभवात्। षष्ठ्यर्थ आधेयत्वं अनुयोगिताच प्रथमप्रकारतायां अभावे च अन्वेतीत्यविवादम् एवं[१५] च प्रकारतानिरूपितविशेष्यतानिरूपितत्वं आधेयतां च विहाय षष्ठ्यर्थानुयोगितायां यदर्थान्वये यद्व्यतिरेकज्ञान प्रतिबध्यत्वं लभ्यते व्यतिरेकनिश्चयस्यापि यद्व्यतिरेकज्ञानत्वेन क्रोडीकारात्तदुपादानमपि व्यर्थम्। न च यद्व्यतिरेकज्ञानत्वेन प्रतिबन्धकत्व विवक्षायां अव्यभिचारव्यतिरेकसंशयनिश्चयोभयप्रतिबध्ये अव्यभिचारनिश्चयाजन्ये अव्यभिचारनिश्चये व्यभिचार इति वाच्यम्। ग्राह्यसंशयत्वाविशेषात् अव्यभिचारव्यतिरेकसंशयस्य अव्यभिचारनिश्चय प्रतिबन्धकत्वा-नङ्गीकारादित्यभिप्रायेण पूर्वार्धे आक्षिप्यते। **कात्स्न्र्यतः तस्याभावधीः यद्व्यतिरेकज्ञानसामान्यंयत्र निष्कम्पप्रवृत्यादौ आशु प्रतिबन्धिका भवति।** प्रतिबन्धकत्वमिह कारणीभूताभावप्रतियोगित्वमेव न प्रयोजकाभावप्रतियोगित्वं इति सूचनायाश्विति। **तस्मिन्** निष्कम्पप्रवृत्त्यादौ। **तस्य विनिश्चयः** प्रमात्वादेस्तथाविधस्य निर्णयः **जनकः** कारणम् - इत्युक्तिः इति न्याय प्रयोगः। **तत्र** - निष्कम्पप्रवृत्यादौ। **सा** - प्रमात्वाभावधीः। **प्रतिद्वन्द्विनीनहि** न प्रतिबन्धकेत्यर्थः। प्रमात्वव्यतिरेकज्ञानसामान्यप्रतिबध्यत्वस्य हेतोरसिद्धिरिति भावः।

---

१५. एवं चेति - षष्ठ्यर्थ आधेयत्वम् अनुयोगिता च प्रथमप्रकारतायाम् अभावे चान्वेति। संशयपदार्थे प्रकारतानिरूपितविशेष्यतानिरूपितत्वं चान्तर्गतम्। आधेयत्वस्य षष्ठ्यर्थत्वं, संशयत्वघटक प्रकारतानिरूपितविशेष्यतानिरूपितत्वं च त्याज्यम्। एवं च यस्य संशय इत्यत्र षष्ठ्यर्थः अनुयोगितामात्रमभावेऽन्वेति। यन्निरूपितानुयोगिताश्रयाभावज्ञानं प्रतिबन्धकमिति लभ्यते यस्य संशय इति वाक्येन। तेनैव यद्व्यतिरेकनिश्चयस्यापि क्रोडीकारात् व्यतिरेकनिश्चयोपादानं व्यर्थमिति एतेषामाशयः।

तदेवोपपादयति तत्संदेहवत इत्यादिना तत्सन्देहवतः - प्रमात्वसंशयवतः। अर्थावधृत्यत्ययात् - अर्थावधारणविरहात्। आरम्भः - निष्कम्पप्रवृत्तिः। न भवितेति - न भविष्यतीत्यतोहेतोर्नप्रतिद्वन्द्विनीत्यन्वयः। प्रामाण्यसंशये सत्यर्थसंशयेन अर्थावधारणरूपकारणा विरहादेव प्रवृत्त्यभावनिर्वाहेण प्रमात्वसंशयस्य प्रतिबन्धकत्वं न कल्पनीयमिति भावः।

ननु प्रवृत्तावर्थनिश्चयेस्येव प्रमात्वसंशयाभावस्यापि नियतान्वय व्यतिरेकसत्वात् कारणत्वं दुरपपादमिति चेन्न । क्लृप्त तदितरसकलकारणसमवधानदशायां यत्सत्तया कार्यानुत्पादस्तदभावस्य कारणत्वकल्पनेन तस्य प्रतिबन्धकता इह त्वर्थावधारणसमवधाने प्रवृत्त्यनुत्पादोऽसिद्धः। [१६]न च श्रुतार्थनिश्चयः प्रामाण्यसंशयात्मकः यत्र वा प्रामाण्यसंशयद्वितीयक्षणेर्थनिश्चयस्तत्र द्वितीयक्षणे तृतीयक्षणे प्रवृत्त्यनुत्पादो दृष्ट इति वाच्यम्। अप्रामाण्यग्रहानास्कन्दितनिश्चयस्यैव कारणतया तत्र क्लृप्तेतरकारणसमवधानविरहात् । अत्र व्याप्तिसंशयव्यतिरेकनिश्चययोरनुमितिप्रतिबन्धकत्वस्याभावात् दृष्टान्तासिद्धिरपि सम्भवतीत्यवधेयम्।[१७]

दीधितिकृतस्तु - [१८]यस्य संशयव्यतिरेकनिश्चयौ - यद्व्यतिरेकसंशयनिश्चयौ, तेन व्यतिरेकज्ञानत्वेन प्रतिबन्धकता लभ्यत इत्याहुः।

---

१६. अथार्थनिश्चयकाले तद्द्वितीयक्षणे वा यत्र प्रामाण्यसंशयः इत्यादि गदाधरीयग्रन्थेऽयं विषय उक्तः (प्र.वा-पृ.सं-१२)। तत्र अर्थनिश्चयकालीनत्वं श्रुतार्थनिश्चयात्मकत्वं प्रामाण्यसंशयस्य।

१७. अवधेयम् इति - मूले स्वरूपासिद्धिप्रदर्शनं दृष्टान्तासिद्धेरप्युपलक्षणं बोध्यमिति भट्टाचार्योक्तमत्र भाव्यम् (प्र.वा-पृ.सं.१२)।

१८. यस्य संशयव्यतिरेकनिश्चयाविति - (प्र.वा-पृ.सं.८)

स्वरूपसम्बन्धरूपावच्छेदकत्वसमर्थनम्

यत्तु - अत्र तस्य व्यतिरेकनिश्चयावित्येद्यद्व्यतिरेकज्ञानसामान्यपरं अवश्यं वर्णयिष्यति। सामान्यलाभश्च यावत्विशेषोपादाने घटेत नान्यथा, यथाश्रुते च तदभाववद्भेदतदभावोभयकोटिकसंशयासंग्रह इति व्यतिरेक पदव्यत्यासः कृत इति गदाधरभट्टाचार्यैः [१९]उक्तम्। तन्न। व्यतिरेकज्ञानत्वेनेत्यस्य स्वरूपसम्बन्धरूपावच्छेदकतापर्याप्तिपरतया व्यतिरेकज्ञानसामान्यस्य विवक्षणीयत्वासिद्धेः। तृतीयायाः पारिभाषिकानतिरिक्तवृत्तित्वपरत्वे लक्षणाप्रसङ्गात्। लक्षणाकल्पनस्यान्याय्यत्वात्।

यत्तु - तदर्थ [२०]पर्यालोचने गौरवमेव लक्षणाबीजमिति। तदसत् [२१]तादृशप्रतिबन्धकत्वत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभाववद्वृत्तित्वत्वपर्याप्तावच्छेदकताकप्रतियोगिताकाभाववत्त्वादि रूपस्य अनतिरिक्तवृत्तित्वस्याप्यनेकपर्याप्तिघटितत्वेन विपरीतगौरवात्।

[२२]केचित्तु - स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्व, स्वसामानाधिकरण्य उभयसम्बन्धेन विषयिताविशिष्ट-

---

१९. गदाधरभट्टाचार्यैरुक्तमिति - (प्र.वा-पृ.सं.-७)

२०. पर्यालोचन इति - समुदायपर्याप्तेः समुदायिनि वृत्तित्वात् ग्राह्यज्ञान प्रतिबन्धकतावच्छेदककोटौ संशयान्यत्वस्य आधिक्येऽपि ग्राह्यव्यतिरेकज्ञानत्वे तत्पर्याप्तिरावश्यकी। अन्यथा प्रत्येकवृत्तेः समुदायावृत्तित्वप्रसङ्गात्। अतः व्यतिरेकज्ञानत्वत्वावच्छिन्नपर्याप्तिसम्बन्धो वाच्यः। तत्राप्यवच्छेदकत्वं यदि स्वरूपसम्बन्धविशेषः तदा अनवस्था। अनतिरिक्तवृत्तित्वं चेत् तदा गौरवात् किं स्वरूप सम्बन्धरूपावच्छेदकत्वनिवेशेन इत्यर्थः।

२१. अनुमितिप्रतिबन्धकत्वघटोभयाभाववति अव्यभिचारव्यतिरेकज्ञाने अव्यभिचारव्यतिरेकज्ञानत्वस्य वृत्तित्वात् दृष्टान्तासिद्धिरतः प्रथम पर्याप्तिनिवेशः। एवं द्वितीयपर्याप्तिनिवेशप्रयोजनमपि बोध्यम्।

२२. केचित्तु इति - (पृं.सं.-७)

विषयिताशालिज्ञानं संशयपदार्थः। तथा च संशयपदं व्यतिरेकावगाहि-समानधर्मिकज्ञानपरमिति पक्षे यस्येत्येकस्याः षष्ठ्याः संशयत्वघटकविषयितानिरूपकत्वं व्यतिरेकान्वयि च प्रतियोगित्वं चार्थ इत्येकार्थत्वानिर्वाह इति व्यतिरेकपदव्यत्यासः यः कृतः स न युक्तः। न च विषयितानिरूपकत्वं तत्प्रतियोगित्वमेवेत्येकार्थत्व निर्वाह इति वाच्यम्। अभावनिरूपितस्य विषयितानिरूपितस्य च प्रतियोगित्वस्य एकजातीयत्वविरहादित्याहुः[२३]। तच्चिन्त्यम् [२४]कोटिद्वयप्रकारतयोरेक-विशेष्यतानिरूपितत्वपक्षे उक्तसंशयत्वनिर्वचनायोगात् निश्चयीय-विषयितायाः संशये असत्वात् संशयीयविषयितायाः प्रतिबन्धकता-नवच्छेदकत्वात्। [२५]अस्मदुक्तसंशयत्वाङ्गीकारे ऐकार्थ्यसम्भवात्।

अथ किमिह न - इत्यादि शङ्कायाः परिहारमाह।

मैवं प्रमात्त्वविशयादुत्तरमिदमित्थमेवेति।
ज्ञप्तेः प्रवृत्तिहेतोः प्रमात्वनिर्धारणप्रयोज्यज्वात्॥ ६॥

षष्ठश्लोकार्थविवरणम्

मीमांसकमतप्रस्तावश्च

विशयात् - संशयात्। मीमांसकः प्रत्यवतिष्ठते।

२३. अभावस्य विषयितायाश्च भेदात् तन्निरूपितयोः प्रतियोगित्वयोरपि परस्परं वैजात्यं स्वीकर्तव्यमिति भावः।

२४. संशये कोटिद्वयप्रकारतानिरूपितैकविशेष्यतास्वीकारपक्षे संशयनिश्चयं साधारण्येन विषयतायाः समानत्वं वक्तुं न शक्यत इति संशयत्वं प्रतिबन्धकतावच्छेदकविषयताघटितं न निर्वक्तुं शक्यमिति भावः। अधिकविचारः सत्प्रतिपक्षग्रन्थे रत्नकोशकारमतनिरूपणावसरे।

२५. अस्मदुक्तेति-प्रकारतानिरूपकविशेष्यतानिरूपिताभावप्रकारताशालिज्ञानत्वम् संशयपदार्थतावच्छेदकम् इति।

ननु च स्वतः एवास्तु प्रमात्वनिरूपणम्। तथाहि अत्र विहिता इमा विप्रतिपत्तयः। तज्ज्ञानप्रामाण्यं स्वप्रकाशेन तेनैव गृह्यत इति गुरवः। तदनुव्यवसायेनेति मुरारिमिश्रः। ज्ञानस्यातीन्द्रियतया तज्जन्यज्ञाततालिङ्गकानुमित्या गृह्यत इति भाट्टाः। नैयायिकास्तु तर्ज्ज्ञानप्रत्यक्षाद्यनन्तरं संवादिप्रवृत्तिजनकत्वादिलिङ्गकयानुमित्यागृह्यते इति वदन्ति।

तत्र त्रिविधैः मीमांसकैः सह नैयायिकानां वादकथायां विप्रतिपत्तित्रिकं मूले प्रदर्शितम्। तत्र ज्ञानप्रामाण्यं तदप्रामाण्याग्राहक यावज्ज्ञानग्राहकसामग्रीग्राह्यं नवेति प्राथमिकविप्रतिपत्तिः। अत्र पक्षे ज्ञानपदं प्रामाण्यपदार्थस्य तद्वतितत्प्रकारकत्वस्य तत्तदर्थघटकघटत्वादि प्रकारभेदेन भिन्नतया यदा यद्धर्मवति यद्धर्मप्रकारकत्वं पक्षः तदा तद्धर्मप्रकारकज्ञानग्राहकसामाग्रीग्राह्यत्वमेव साध्यं इति सूचनाय।

यत्तु - इच्छादिनिष्ठघटत्ववतिघटत्वप्रकारकत्वे साध्यघटक-ज्ञानपदस्य[२६] स्वाश्रयपरत्वे घटमिच्छामीत्यनुव्यवसायादि सामग्र्या अग्राह्यत्वात् बाधवारणाय ज्ञानपदं इति। तन्न। तद्वतितत्प्रकारकत्व-रूपप्रकर्षबोधकप्रशब्दोपसहिंतज्ञानत्वावच्छिन्न-बोधकमादाय तेन तद्धितप्रत्ययपूर्वकं निष्पन्नस्य प्रामाण्यपदस्य तद्वतितत्प्रकारकत्व-विशिष्टज्ञानत्वार्थकतया ज्ञानत्वघटितत्वादेव तद्वारणात्।[२७]

---

२६. प्र.वा-पृ.सं.२, साध्यघटकज्ञानपदस्य स्वाश्रयपरत्वे - इति- ज्ञानग्राहकेत्यत्र ज्ञानपदस्य पक्षीभूतप्रामाण्याश्रयपरत्वे पक्षत्वेन इच्छादिनिष्ठ घटत्ववति घटत्वप्रकारत्वं यदि\स्वीक्रियते तदा साध्यघटकज्ञानग्रहपदेन 'इच्छामि' इत्यनुव्यवसायः स्वीकर्तुं शक्यः। ज्ञानपदस्य यथाश्रुतार्थकत्वे तु तादृशानुव्यवसायो न ग्राह्यः स्यात्। तन्नेत्यादि दूषणं स्पष्टम्।

२७. प्र.वा-पृ.सं.१७

यदपि प्रमाणपदं तावत्करणल्युटाभावल्युटाच द्विधा निष्पद्यते ततः प्रकृत्यर्थतावच्छेदकबोधकतयानुशिष्टेन तद्धितेनेह प्रमाकरणत्वं प्रमात्वंञ्च प्रतिपाद्यत इति प्रकृते प्रमाकरणत्वरूपप्रामाण्यव्युदसनायज्ञानपदम्।

तथा च ज्ञानस्यप्रामाण्यमितिव्युत्पत्या षष्ठ्यन्तेन तेन ज्ञानवृत्तित्वबोधनात् प्रमाकरणत्वनिरसननिर्वाहः। न चैवं प्रमाकरणत्वस्यापि व्याप्तिज्ञाननिष्ठत्वात् न तावत् न निर्वाह इति वाच्यम्, विशेषणं[२८] व्यवच्छेतृ विशेष्यव्यापिचोच्यत इति न्यायेन असति बाधके विशेष्यतावच्छेदकावच्छेदेन विशेषणसम्बन्धलक्षणस्य विशेष्यव्यापित्वस्यावश्यंम्भानादिह प्रमितिकरणत्वस्य मनःप्रभृतिवृत्तित्वेन प्रमितिकरणत्वत्वाच्छेदेन ज्ञानवृत्तित्वस्यबाधात्प्रमात्वत्वाच्छेदेन तदबाधाच्च तद्व्युदाससम्भवात्। न च ज्ञानपदस्यापि ज्ञायते अनेनेति व्युत्पत्त्या ज्ञानकरणार्थकत्वस्यापि सम्भवात् प्रमाकरणत्वत्वस्य ज्ञानवृत्तित्वव्यभिचारित्वात् न तत्समभिव्याहारेणापि तद्व्युदसनसम्भवइति वाच्यम्।[२९] अनेकार्थस्यापि गोपदस्य ज्ञानपदस्य ज्ञप्तावेव भूरिप्रयोगेन ज्ञानकरणपरत्वशङ्कानुदयात् इत्युक्तम्।

तन्न। प्रवर्तकज्ञानगोचरप्रमात्वात्मकप्रामाण्यपदार्थस्याधिकारादेव प्रमाकरणत्वपरत्वशङ्कानुदयात्। यद्यपि प्रमाणतत्त्वं अत्र विविच्यत इति तदपि प्रकृतं तथापि स्वतस्त्वपरतस्त्वनिर्धारणविषयतया विप्रतिपत्तिस्तद्विषयिण्येव प्रदर्शनीया, अन्यथा उन्मत्त प्रलपितत्वप्रसङ्गादिति परमप्रकृतं प्रमात्वमेवेत्यवधेयम्। अत्र साध्येऽपि

---

२८. विशेषणं विशेष्यव्यापीत्यस्यायमर्थः - विशेष्यतावच्छेदकावच्छेदेन विशेषणसम्बन्धःवक्तव्यो भवति। प्रमितिकरणत्वव्यापकं ज्ञानवृत्तित्वं नास्तीत्यर्थः।

२९. प्र.वा-पृ.सं. १८

ज्ञानपदं [३०]ज्ञानसामान्यपरम् । घटत्ववति घटत्वप्रकारकत्वादि-रूपप्रामाण्यस्य विशिष्यपक्षत्वेन ज्ञानग्राहकसामग्रीजन्यपटानु-व्यवसायाद्यग्राह्यतया बाधापत्तेः। किन्तु पक्षीभूतप्रामाण्याश्रयपरम्। तथा च तस्मिन्नप्रामाण्यस्याग्राहिका यावती तज्ज्ञानग्राहिका-सामग्रीतद्ग्राह्यत्वमेव साध्यं फलितम्। तत्र सामग्र्यां यावत्त्वविशेषणमनुचितं यावत्सामग्रीजन्यग्रहाप्रसिद्धेः। [३१]नहि सर्वाभिः ज्ञानग्राहिकाभिस्सामग्रीभिर्जन्यं किमपि ज्ञानमस्ति अतो यावत्त्वं फलतोग्रह विशेषणमाश्रित्य परिष्कृत्य विप्रतिपत्त्याकारं दर्शयति।

अप्रामाण्याग्राहिकास्वाश्रयांशे स्वाधारस्यग्राहिकायाप्रसिद्धा।
तत्सामग्रीजन्ययावद्ग्रहाणां तत्प्रामाण्यं गोचरोवा न वेति।। ७।।

सप्तमश्लोकविवरणम्

स्वाश्रयांशे अप्रामाण्याग्राहिका स्वाश्रनिष्ठविशेष्यतानिरूपिता प्रामाण्यनिष्ठप्रकारताकग्रहाजनिका **स्वाधारस्यग्राहिका** स्वाश्रय-विषयकग्रहजनिका या **सामग्री** तद्जन्ययावद्ग्रहाणां तज्ज्ञानप्रामाण्यं विषयो न वा। इतीति विप्रतिपत्तिरिति शेषः। अत्र यावत्त्वस्य व्यापकत्व-पर्यवसायितया तादृशग्रहत्वव्यापकविषयिताकत्वं ग्राह्यान्तार्थः पर्यवसितः।

यद्यपि नैयायिकानां घटत्वप्रकारकत्वादेरनुव्यवसायविषयताया निर्विवादत्वात् तस्य च प्रामाण्यानतिरेकात्सिद्धसाधनं दुर्वारम्। तथापि[३२]

---

३०. नज्ञानसामान्यपरमिति - अयं भावः - घटत्ववतिघटत्वप्रकारकत्वादि-रूपप्रामाण्यं विशिष्यपक्षः। ज्ञानग्राहकसामग्रीजन्यपटानुव्यवसायेन पक्षीभूतप्रामाण्यं न गृह्यत इति बाधः। ज्ञानपदेन पक्षीभूतप्रामाण्यश्रयज्ञानस्य स्वीकारे पटाद्यनुव्यवसायो न स्वीकार्य इति न दोष इति।

३१. प्र.वा-पृ.सं. २३

३२. घटत्वनिष्ठावच्छेदकतानिरूपितेति - विशेष्ये घटत्वप्रकारकत्वे अनुव्यवसायंविषयत्वमस्ति चेत् घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्व-

घटत्वनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपिता-धेयत्व निष्ठावच्छेदकतानिरूपित विशेष्यतानिष्ठावच्छेदकतानिरूपित निरूपकत्व निष्ठावच्छेदकतानिरूपितावच्छिन्नत्वनिष्ठावच्छेदकता-निरूपिता या घटत्वनिष्ठाच्छेदकतानिरूपिताधेयतानिष्ठावच्छेदकता-निरूपितप्रकारता निष्ठावच्छेदकतानिरूपितनिरूपकतात्वनिष्ठावच्छेदकता तन्निरूपक निरूपकताकविषयिताज्ञानत्वीयविषयितान्यतरविषयिता-सम्बन्धेन व्यापकत्वकोटिकविप्रतिपत्तौ तात्पर्यात् न दोषः । न चैवं कालिकविशेषणतासम्बन्धेन ज्ञानांशे प्रामाण्यभानमादाय अर्थान्तरप्रसङ्गः इति वाच्यम् । प्रथम विषयितायां विशेषणताविशेषसम्बन्धघटितत्वस्य विवक्षणीयत्वात् । तथा चेदानीं ज्ञाननिष्ठघटत्ववतिघटत्वप्रकारकत्वे निरुक्तान्यतरविषयितासम्बन्धावच्छिन्नतादृशग्रहनिष्ठात्यन्ताभाव-प्रतियोगितात्वावच्छिनाभावो मीमांसकानां कोटिः । ज्ञानत्वीय-विषयितोपादानञ्च ज्ञानत्वे कोटिप्रसिद्धिक्लृप्तये । अविघ्नमस्तु ।

प्रकारकत्वेऽपि तत् अस्त्येवेति पूर्वपक्षे विप्रतिपत्तिस्वरूपपरिष्कारः क्रियते । तादृशग्रहत्वव्यापकविषयिताकत्व कोटिक विप्रतिपत्तिः पूर्वमुक्ता। इदानीं विशिष्ट प्रामाण्यं तादृशग्रहत्वव्यापकं वानवेति विप्रतिपत्तिः। ग्रहत्वव्यापकत्वं च तादृशग्रहत्व समानाधिकरणात्यन्ताभावप्रतियोगित्वाभावः। प्रतियोगिता च घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारत्वनिरूपितविषयिता ज्ञानत्वनिरूपितविषयितान्यतरविषयितासम्बन्धावच्छिन्ना। अत्र परिष्कारे अवच्छेदकतानिरूपितेत्यादौ अवच्छेदकतानिरूपकतानिरूपितावच्छेकता बोध्या। ज्ञानत्वविषयितायाः पृथक् निवेशः तादृशनिरूपकतानिरूपित विषयितासम्बधेन नैयायिकमते ग्रहत्वव्यापकत्वस्याभावात् साध्याप्रसिद्धिरिति तद्वारणार्थः। अर्थान्तरमिति - स्वतस्त्वसाधने प्रवृत्तानां मीमांसकानां अनाकाङ्क्षिताभिधानरूपम् इत्यर्थः। न हि मीमांसकैः कालिकविशेषणता सम्बन्धेन ज्ञानांशे प्रामाण्यभानं भवतीति तस्य स्वतस्त्वं सिषाधयिषितम् ।

भट्टाचार्योक्तार्थान्तरदोषासंभवोपपादनम्

यत्तु - तज्ज्ञानवृत्तिघटत्ववतिघटत्वप्रकारकत्वं तदप्रामाण्याग्राहकस्वाश्रयग्राहकसामग्रीजन्यग्रहनिष्ठात्यन्ताभाव प्रतियोगितानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकता पर्याप्त्यनधिकरणं नवेति केषांचित् परिष्कारे गुरूणां मते व्यवसायात्मकग्रहग्रहेघटत्ववति घटत्वप्रकारकत्वाधिकरणत्वसत्वेनैव तादृशप्रामाण्ये निरुक्तावच्छेदकत्वाभावरूपसाध्यसत्त्वनिर्वाहात् प्रामाण्यविषयकत्वं व्यवसायादौ न सिद्ध्यतीत्यर्थान्तरप्रसङ्ग इति गदाधरभट्टाचार्यैः दूषणं दत्तम्।[३३]

तन्न। विषयित्वीयविलक्षणनिरूपितत्वसम्बन्धावच्छिन्न तादृशग्रहनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावरूप साध्यस्यैवोक्तपरिष्कारे विवक्षणेनाधिकरणत्वीयनिरूपितत्वमादाय पर्यवसानासम्भवेन गुरुमतेऽर्थान्तरशङ्कानवकाशात्। अधिकरणविषयित्वयोः निरूपितत्वं नैकमिति संमन्यते नैयायिकैः। त्वयापि चावश्यम् इदमेवाङ्गीकरणीयम्। अन्यथा मिश्रादिमतेप्यनुव्यवसायादौ कालिकविशेषणतासम्बन्धावच्छिन्नतज्ज्ञानीयप्रमात्वाधिकरणताया अबाधेन तामादाय साध्यपर्यवसानापत्त्यार्थान्तरस्य स्वापादतया गुरुमतमात्र [३४]दूषणोपन्यसनस्यासम्भवात्। व्यतिरेकनिश्चयौ

---

३३. प्र.वा-पृ.सं.२४ 'तदपि न। गुरुमते व्यवसायरुपग्रहग्रहे विशिष्टप्रामाण्यनिरूपिताधिकरणतासत्त्वेनैव तस्य निरूपितत्वसम्बन्धेन व्यवसायवृत्यभावप्रतियोगितायामनवच्छेदात् व्यवसाये प्रामाण्यविषयित्वासिद्धेः' इति तत्रत्यपङ्क्तिः।

३४. अयंभावः - अधिकरणविषयित्वयोः निरूपितत्वं नैकमिति सिद्धान्तः। अन्यथा मिश्रमते अनुव्यवसाये कालिकविशेषणतासम्बन्धेन प्रमात्वाधिकरणतायाः सत्वात् विधिकोटेः नैयायिकमतेऽपीष्टत्वात् तन्मते सिद्धसाधनम्, मिश्रमतेऽर्थान्तरमिति च वक्तुं शक्यते। एवं च गुरुमतमात्रे दूषणोपन्यासो न युक्तः स्यात्।

यत्प्रवृत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुरित्यत्र यस्यव्यतिरेकसंशय-निश्चयाविति व्यत्यस्यतो दीधितिकृतः तात्पर्यवणेनवेलायां यस्येति षष्ठ्या एकस्याः संशय व्यतिरेकपदार्थान्वय्यर्थद्वयबोधकत्वासम्भवं व्यत्यास-मूलतया व्याख्यांय स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धक-त्वावच्छेदकत्व स्वसामानाधिकरण्योभयसम्बन्धेन विषयिताविशिष्ट-विषयिताशालिज्ञानार्थक [३५] संशयपदार्थतावच्छेदकचरमविषयितान्वयि-निरूपकत्वापरपर्यायप्रतियोगित्वस्य व्यतिरेकान्वयिप्रतियोगित्वस्य-चैक्यमांशङ्क्य विजातीयनिरूपितयोः प्रतियोगितयोर्नैकजातीयत्वमिति स्वयमेव सिद्धान्तितत्त्वेन तन्न्यायेन इहापि निरूपकाधिकरणताविषयिता वैलक्षण्येन तन्निरूपकत्वयोर्वैक्षण्यस्यावश्यं भावेन निरूपितत्वयो-र्वैजात्यस्यावश्यकत्वादपि नोक्तदूषणसम्भवः।

यदपि घटत्वप्रकारकत्वत्वावच्छिन्ने तादृशग्रहनिष्ठात्यन्ताभाव-प्रतियोगितावच्छेदकत्वाभावस्य सत्वेन विशिष्टप्रामाण्यस्य तदनतिरिक्ततया सिद्धसाधनम्। न च विशेषणान्तर्भावेन विशेष्य अवच्छेदकत्वविरहसिद्धेरुद्देश्यतया तदसिद्धया न सिद्धसाधनमिति वाच्यम्। [३६] अनुमानात्पक्षतावच्छेदकविशेषणांशेसाध्यवत्त्वभानासम्भवेन तदन्तर्भाविण पक्षेसाध्यसिद्धेः उद्देश्यत्वासम्भवात् इत्युक्तम्।

---

३५. प्र.वा-पृ.सं.८

३६. प्र.वा-पृ.सं.२४ - अनुमानात् पक्षतावच्छेदकविशेषणांशे साध्यवत्त्वभानासंभवेनेति - अयमर्थः यथा नीलरूपवत्पर्वतो वह्निमानित्यादौ नीलरूपांशे वह्निमत्त्वज्ञानासंभवेन न नीलरूपांशे इच्छीयविशेष्यत्वरूपमुद्देश्यत्वं संभवति किन्तु नीलरूपविशिष्टपर्वतांशे एव, तथा प्रकृतेऽपि घटत्वव द्विशेष्यकत्वरूपपक्षतावच्छेदकेऽपि निरुक्तसाध्यस्योद्देश्यत्वासंभवात् पक्षतावच्छेदकविशिष्टपक्षे एव साध्यानुमितिः भवति। एतद्दूषणं विशेषणान्तर्भाविण इत्यस्य विशेषणे विशेष्ये चेत्युभयत्र साध्यं सिषाधयिषितम् इति अर्थवर्णनपक्षे।

तदपि न। घटत्वप्रकारकत्वत्वावच्छेदेन घटत्वप्रकारकत्वसिद्धावपि घटत्ववद्विशेष्यकत्वावच्छिन्नत्वरूपविशेषणविशिष्टघटत्व-प्रकारकत्वत्वावच्छेदेन तदसिद्धेः [३७]सिद्धसाधनानवकाशात्।

तथा हि - अवच्छेदकावच्छेदेन साध्यसिद्धिर्नाम साध्यांशे साध्यतावच्छेदकसंसर्गांशे वा अवच्छेद्यत्वावगाहिनी अनुमितिरिति तावत्पक्षतायां[३८] भवद्भिरेवोक्तम्। तदत्र केवलघटत्वप्रकारकत्व-त्वावच्छेद्यतायाः नैयायिकैः स्वीकारेऽपि घटत्ववद्विशेष्यकत्वावच्छिन्न घटत्वप्रकारकत्वत्वावच्छेद्यता अननुमतैव मीमांसकानुमितिविषयः। न च विशिष्टावच्छेद्यता विशेष्यनिरूपितावच्छेद्यता सा च न विलक्षणेति भ्रमितव्यम्।[३९] पार्थिवगन्धोजलावृत्तिरिति पार्थिवगन्धत्वावच्छेदेन

---

३७. सिद्धसाधनं वारयति - घटत्वप्रकारकत्वत्वावच्छेदेनेति ग्रन्थेन घटत्वप्रकारकत्वे यद्यपि स्वतस्त्वं नैयायिकमतेऽपि सिद्धम् तथापि घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वत्वविशिष्टे स्वतस्त्वस्य नैयायिकमते नेष्टत्वात् न सिद्धसाधनमिति। न च विशेष्ये स्वतस्त्वं सिद्धं चेत् विशिष्टे तन्नास्ति इति कथं वक्तुं शक्यम्, विशिष्टानुयोगिक विशेष्यवृत्तिप्रतियोगिकाभावस्यानङ्गीकारात् इति वाच्यम्, घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वत्वावच्छिन्नत्वं साध्यांशे तत्संसर्गांशे वा भासते इति नियमात्। तच्च घटत्व प्रकारकत्वत्वनिरूपितावच्छिंन्नत्वापेक्षया भिन्नमेव। एवं च तादृशावच्छेद्यतावगाहिन्यामनुमितौ उद्दिष्टायां सिद्धसाधनं नास्त्येव।

३८. पक्षता ग्रन्थः - पृष्ठ सङ्ख्या. १७५

३९. पक्षता - पृ.सं.१९४ 'न चैकरूपेण समानधर्मिविषयकत्वमेव विपरीतज्ञान प्रतिबन्धकत्वे बीजम्, तथा सति पार्थिवगन्धत्वावच्छेदेन जलावृत्तित्वादि निश्चयस्यापि शुद्धगन्धत्वावच्छेदेन तन्निश्चयस्येव गन्धो जलवृत्तिर्नवेति गन्धत्व सामानाधिकरण्येन जलवृत्तित्वादिसंशये विरोधिताप्रसङ्गात्, उभयोरेव निश्चययोः गन्धत्वादिना तदाश्रययावद्धर्मिणि ग्राह्याभावावग्राहिताया अविशेषात्, विरोधिविषयकत्वाविशेषे धर्मितावच्छेदककोटावधिकभानस्याविरोधिता-बीजत्वाभानात्। द्वितीयस्य विरोधित्वे प्रथमस्यापि तथात्वौचित्यात्। नव्यमते उभयनिश्चयविषयव्यापकतयोः भेदेन विशेषसंभवादिति'

जलावृत्तित्वनिश्चयेसति गन्धोजलावृत्तिर्नवेति संशयोत्पत्त्या गन्धोजलावृत्तिरिति केवलगन्धत्वावच्छेदेन जलावृत्तित्वनिश्चयेसति तदनुत्पत्त्या तन्निर्वाहायावच्छेद्यतयोः वैलक्षण्यस्यावश्यकत्वात् स्वयं पक्षतायामेवं निरूपणाच्च।

एतेन विशिष्टप्रामाण्यनिरूपितत्वविशिष्टविषयितात्वं तादृशग्रहत्व-व्यापकतावच्छेदकं नवेत्यादि नाकेंषाचित्[४०] परिष्कारोपि समर्थितः।

यत्तु - तादृशग्रहनिष्ठाभावप्रतियोगितात्वावच्छिन्नं विशिष्टप्रामाण्य-निरूपितविषयितात्वानच्छिन्नं नवेति तु प्रथमविप्रतिपत्तिनिष्कर्ष इति गदाधरभट्टाचार्यैः[४१] सिद्धान्तितम्।

भट्टाचार्योक्तप्रथमविप्रतिपत्तिनिष्कर्षपरिशीलनम्

तत्र ब्रूमः। तत्र निषेधकोटिस्तदप्रामाण्याग्राहक तज्ज्ञानग्राहक-सामग्रीजन्यनिष्ठाभावप्रतियोगितात्वावच्छेदेन नैयायिकैः सिषाधयिषिता तादृशप्रतियोगितात्वसामानाधिकरण्येन वा। नाद्यः। घटज्ञानप्रामाण्य-विषयित्वत्वावच्छिन्नत्वाभावसाध्यकस्थले पटत्ववति पटत्वप्रकारकत्व-विषयित्वत्वाद्यवच्छिन्नासु तादृशघटज्ञानग्राहकसाग्रीजन्यग्रहनिष्ठाभाव प्रतियोगितासु घटज्ञानप्रामाण्य विषयित्वत्वानवच्छिन्नत्वस्योभयवादि सिद्धत्वेनबाधात्। अत एव न द्वितीयः। तादृशग्रहनिष्ठाभाव प्रतियोगितात्वेनोभयमतसिद्धासु सर्वप्रतियोगितासु घटज्ञान प्रामाण्यविषयित्वत्वावच्छिन्नत्वसत्वात्। घटज्ञानप्रामाण्यविषयितानिष्ठ प्रतियोगिताविशेषं पक्षीकृत्य तादृश विषयितात्वानवच्छिन्नत्वा-भावस्साधयितुमशक्यः। परमते तादृशग्रहेषु घटज्ञानप्रामाण्य-विषयकत्वाभावस्य शशविषाणकल्पतया तदीय प्रतियोगितायास्त-

४०. प्र.वा-पृ.सं.२५

४१. सिद्धान्तितमिति - प्र.वा-पृ.सं.२५

तुल्यत्वात् । पक्षतावच्छेदकरूपेण पक्षस्य परासिद्धत्वे परार्थानुमानस्य न्यायसिद्धान्तपद्धतिविरुद्धत्वात् ।

अत एवान्यथाख्यातिवादे रजतत्वप्रकारकज्ञानविषयता अरजतवृत्तिरित्यनुमाने परमते शुक्तौ रतत्त्वप्रकारतानिरूपितज्ञानीय विशेष्यताया असिद्धिमभिप्रेत्य दीधितिकृता यद्युभयमतसिद्धा रजतत्वप्रकारकविषयतापक्षः तदा बाधः अथ शुक्तिनिष्ठा पक्षः तदा, असिद्धिरिति दूषणे सत्त्येव दूषणान्तरमाहेति मण्युक्ततदनुमानस्य[४२] सोपाधिकत्वदूषणमवतारितम् ।

किञ्च तादृशग्रहनिष्ठाभावप्रतियोगितात्वावच्छिन्ने विशिष्टप्रामाण्य-निरूपितविषयितात्वानवच्छिन्नत्वसाधनमपि विधावनुचितम्, अनुव्यव-

---

४२. सोपाधिकत्वदूषणमिति - त-चि-पृ.स ४६९
रजतत्वप्रकारिका ज्ञानविषयता अरजतवृत्तिः अरजतनिष्ठात्यन्ताभाव। प्रतियोगिनी वा अरजतविषयकप्रवृत्तिहेतुज्ञानविषयतात्वात् शुक्तिवृत्तिविषयतावदित्यनुमाने रजतावृत्तित्वमुपाधिः । दृष्टान्ते शुक्तिवृत्ति विषयतादौ तस्य साध्यव्यापकत्वात्, रजतत्वप्रकारकज्ञानविषयतारूपपक्षे साधनवति असत्त्वेन साधनाव्यापकत्वाच्च ।
ननु द्रव्यत्वादौ अरजतनिष्ठात्यन्ताभावप्रतियोगित्वाभाववति उक्तोपाधेः साध्याव्यापकत्वम् । न च तत्र यत्किंचिदरजतनिष्ठात्यन्ताभावप्रतियोगित्वेन साध्याभाव इति वाच्यम् । अरजतत्वावच्छिन्ननिष्ठात्यन्ताभावाप्रतियोगित्वस्यैव साध्यत्वात् । अन्यथा आकाशरूपारजतनिष्ठात्यन्ताभावप्रतियोगित्वेन बाधप्रसङ्गात्। न च विषयतात्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वमस्त्येव इति वाच्यम् । तथापि द्रव्यत्वप्रकारकविषयतायां साध्याव्यापकत्वादिति चेत्, न, रजतावृत्तित्वमित्यनेन रजतमात्रावृत्तित्वस्यैव विवक्षणीयत्वात् ।
अत्र विषयतायाः सप्रकारकत्वोक्तिः तस्याः अतिरिक्तत्वाभ्युपगमपक्षम-वलम्ब्येति ध्येयम् ।

सायादौ प्रमात्वकालीनत्वभानं कालिक-विशेषणतया प्रमात्वभानं चादाय अर्थान्तरप्रसङ्गात्। तथा सत्यपि तादृशग्रहनिष्ठाभावीयप्रतियोगितात्वावच्छिन्ने विशिष्टप्रामाण्यविषयितात्वानवच्छिन्नत्वसम्भवात्।

तथा हि - मीमांसकैः तद्वद्विशेष्यकज्ञानप्रामाण्ये तज्ज्ञानत्वावच्छेदेन स्वरूपसम्बन्धेन निरुक्तसामग्रीग्राह्यत्वमेव साधनीयम्। तज्ज्ञानत्वाच्छेदेन प्रामाण्यग्रहस्यैव पुरोवर्तिनि प्रवर्तकत्वात्। केवलग्राह्यत्वस्य मीमांसकसिषाधयिषाविषयत्वे तदप्रामाण्याग्राहकत्वदलवैयर्थ्यात्। भ्रमत्वप्रमात्वमाभावादिभानेपि निर्धर्मितावच्छेदकप्रमात्वभानसंभवात्। न च तज्ज्ञानत्वावच्छिन्नीयप्रकारित्वत्वानवच्छिन्नत्वं मीमांसकैः सिषाधयिषितमिति नोक्तार्थान्तरप्रसङ्ग इति वाच्यम्। तथापि ज्ञानत्वेन तज्ज्ञानमात्रावगाह्यनुव्यवसायस्यापि तादृशग्रहत्वेन तन्निष्ठाभावप्रतियोगितायां कस्याञ्चित् ज्ञानत्वावच्छिन्नीयविशेष्यतानिरूपितविशिष्टप्रामाण्यविषयितात्वावच्छिन्नत्वसत्वेन प्रतियोगितासामान्ये अनवच्छिन्नत्वसाधने बाधात्। न च चरमग्रहे तज्ज्ञानत्वावच्छिन्नविषयताकत्वं विशेषणं देयमिति [४३]नोक्तबाध इति वाच्यम्। तथा सति ज्ञानग्राहकत्वदलवैयर्थ्यप्रसङ्गात्[४४]। न च तस्यैव तज्ज्ञानत्वावच्छिन्नविषयताकत्वपरता स्वीक्रियत इति वाच्यम्। पटमहं जानामि, घटमहं

४३. नोक्तबाध इति - तथाविधानुव्यासाये ज्ञानत्वेन सामान्यरूपेण तज्ज्ञानभानेऽपि तज्ज्ञानत्वेन रूपेणाभानात् न तत्र तज्ज्ञानत्वावच्छिन्नविषयताकत्वमित्याशयः। चरमग्रहे - तादृशसामग्रीजन्यग्रहे।

४४. वैयर्थ्यप्रसङ्गात् इति। ज्ञानग्राहकत्वविशेषणानुपादाने प्रकृतप्रामाण्याश्रय घटज्ञानेऽप्रामाण्याग्राहिकया पटज्ञानजनकसामग्र्या घटत्वघटितप्रामाण्यग्रहात् बाधः स्यात् इति तत्परिहारायैव हि तदुपादानम्। स च बाधः चरमग्रहे तज्ज्ञानत्वावच्छिन्नविषयताकत्वनिवेशेनैव अवकाशंलभते तादृशसामग्रीजन्यग्रहे तज्ज्ञानत्वावच्छिन्नविषयताकत्वविरहात्। अतो ज्ञानग्राहकत्वदलवैयर्थ्यप्रसङ्गः इति भावः।

जानामि इत्यादि समूहालम्बनानुव्यवसायस्य घटज्ञानीय-तज्ज्ञानत्वेन पटज्ञानं ज्ञानत्वेन च तज्ज्ञानं गृह्णतः तज्ज्ञानत्वानवच्छिन्न-विषयितात्वादुक्तरीत्या बाधतादवस्थ्यात्। न च तज्ज्ञानत्वावच्छिन्न तज्ज्ञाननिष्ठविषयिताकत्वं निवेश्यत इति नोक्तदोषः। विषयतायास्तज्ज्ञाननिष्ठायाः तज्ज्ञानत्वानवच्छिन्नत्वात् तज्ज्ञानत्वावच्छिन्नायाश्च पटज्ञाननिष्ठत्वादिति वाच्यम्। तथापि यत्र पटमहं जानीमीत्यनुव्यवसाये पूर्वोपस्थिततज्ज्ञानत्वावच्छिन्नसमानकालीनत्वभानम् तज्ज्ञानमादाय बाधतादवस्थ्यात्।

अथ स्यात्, अहमर्थविषयतानिरूपिततज्ज्ञानत्वावच्छिन्न-प्रकारताकग्रहजनकत्वं ज्ञानग्राहकदलार्थः। उक्तज्ञाने च तज्ज्ञान-त्वावच्छिन्नप्रकारतायाः कालविषयतानिरूपितत्वात् नानुपपत्तिः। न चैवं भाट्टमतासंग्रहः। इयं ज्ञातता घटत्ववतिघटत्वप्रकारकज्ञानजन्या इत्याद्याकारिकायाः तदीयानुमितेर्जन्यत्वविषयतानिरूपिततज्ज्ञानत्वा-वच्छिन्नप्रकारताकत्वेप्यहमर्थविषयतानिरूपिततज्ज्ञानत्वावच्छिन्न-प्रकारताकत्वविरहादिति वाच्यम्। अहं ज्ञानवान् ज्ञाततावत्त्वादि-त्याद्यकारानुमितेरेव प्रामाणिकैरभ्युपगमात् ज्ञाततालिङ्गकानुमित्या ज्ञानं गृह्यतइति हि तैः उद्धुष्यत इति चेत्।

मैवम्[४५]। तथासत्यपि तज्ज्ञानवदात्मवृत्तित्वाद्युपनय-प्रयुक्ततदव-गाहिताकपटानुव्यवसायमादाय बाधतादवस्थ्यात्। ज्ञातो घटः

४५. मैवमिति - अहमर्थविषयतानिरूपिततज्ज्ञानत्वावच्छिन्नप्रकारताकग्रहजनक सामग्रीत्यनेन उपनीततज्ज्ञानवदात्मवृत्तित्वावगाहिपटानुव्यवसाय-जनकसामग्र्याः उपादाने तज्जन्यतादृशग्रहविषयत्वं घटत्वघटितप्रामाण्ये मिश्रैः नाभ्युपगम्यते। तन्मते ज्ञानविषयो घटः इत्यादिमानसोपनीतभानसामग्र्या यथा प्रामाण्यं न गृह्यते तथा पूर्वोपदर्शितानुव्यवसायसामग्र्याऽपि तज्ज्ञानांशे प्रामाण्यं न गृह्यते इति बाधः स्यात् इति भावः।

इत्याद्युपनीतभान इव तत्रापि तज्ज्ञानांशे मिश्रैः प्रामाण्यभानानङ्गीकारात्। तज्ज्ञानत्वावच्छिन्नविषयतानिरूपित तत्प्रमात्वप्रकारताकत्वं तद्दलार्थं परिष्कृत्य निरुक्तदोषवारणं तु न शङ्कास्पदमपि। नैयायिकानां सिद्धसाधनात् तदप्रामाण्याग्राहकत्वदलविलोपप्रसङ्गाच्च। तज्ज्ञानत्वावच्छिन्नलौकिक विषयताकत्वं तु नार्थः भाट्टमतसंग्रहप्रसङ्गात्। ननु सिद्धान्तेप्येषदोषः। उपनीततज्ज्ञानविषयकपटाद्यनुव्यवसायेषु विशिष्टघटप्रामाण्यविषयिता-ज्ञानत्वीयविषयितान्यतरविषयितासम्बन्धेन घटप्रामाण्याभावसत्वात्। तदन्यतरविषयितासम्बन्धावच्छिन्नतादृशग्रहनिष्ठाभावप्रतियोगितात्वा-वच्छिन्नत्वाभावस्य बाधादितिचेत्।

ज्ञानग्राहकत्वदलपरिष्कारः

अत्रेदं चिन्तयामः। तज्ज्ञानविषयत्वाप्रयोज्यतज्ज्ञानविषयताक ग्रहजनकत्वं ज्ञानग्राहकदलार्थः। तेनोपनीततज्ज्ञानावगाहिताकपटाद्यनु-व्यवसाय[४६] व्युदासः। न चैवं भाट्टमतासंग्रहः [४७]अनुमितौ तज्ज्ञानविषयितायाः परामर्शव्याप्तिज्ञानादिनिरूपिततत्तज्ज्ञानविषयिता प्रयोज्यत्वात् इति वाच्यम्। तन्मते तज्ज्ञानस्यानुमेयस्यपरामर्श व्याप्तिज्ञानादिविषयतानभ्युपगमात्। ज्ञानान्तरविषयकव्याप्तिज्ञानादिनैव अपूर्वतज्ज्ञानानुमितेस्तदभ्युपगमात्। अन्यथा संवादिप्रवृत्तिमत्त्वादि-लिङ्गकानुमित्यवैलक्षण्यप्रसङ्गात्। तथा च उपनीतघटज्ञानीयविषयिताया अलौकिकत्वात् न पूर्वोक्तानुपपत्तिः।

एतेन ज्ञानं गुण इत्यादि शाब्दे यत्र ज्ञानपदेन ज्ञानत्वेन ज्ञानान्तरोपस्थितावपूर्वज्ञानं गोचरः तत्रशाब्दीयतज्ज्ञानविषयिताया

---

४६. व्युदास इति। उपनीततज्ज्ञानवदात्मवृत्तित्वविषयकपटानुव्यवसायीया या तज्ज्ञानविषयता तस्याः तज्ज्ञानविषयताप्रयोज्यत्वात् न दोषः।

४७. अनुमितौ – ज्ञाततालिङ्गकानुमितौ

तज्ज्ञानविषयत्वप्रयोज्यत्वात् तत्सामग्र्या प्रामाण्याग्रहात्बाध इत्यपि शङ्का परास्तातस्याः। लौकिकत्वविरहात् तात्पर्यज्ञानादिविषयताप्रयोज्यवाच्च।

नन्वेवं प्रतियोगितासामान्यपक्षकानच्छिन्नत्वकोटिक विप्रतिपत्ति-मतेपि तज्ज्ञानविषयत्वाप्रयोज्यतज्ज्ञानविषयताकग्रहजनकत्वं ज्ञानग्राहक-दलार्थं परिष्कृत्य उपनीततज्ज्ञानविषयताकपटानुव्यवसायादि वार्यताम्, तथा प्रतियोगितासामान्ये अनवच्छिन्नत्वमिव तदभावोपि प्रतियोगितासामान्ये नैयायिकैः सिषाधयिषाविषयः क्रियताम्, तादृश प्रतियोगितात्वव्यापकदैशिकविशेषणतासम्बन्धावच्छिन्नानवच्छिन्नत्वा-भावस्य निषेधकोटित्वाच्च बाधः प्रतिक्षिप्यताम्, यादृशसम्बन्धेन विधिकोटिः मीमांसकसिषाधयिषाविषयः तादृशसम्बन्धावच्छिन्नतत्कोट्य भावस्य नैयायिकैः साधयितुं उचितत्वात् इति चेत्।

मैवम् मंस्थाः। इदं घटत्वप्रकारकं ज्ञानं सविशेष्यकम् इत्यादि शाब्दसामग्र्याः प्रामाण्याग्राहकत्वात् बाधमुद्भाव्य प्रकारान्तरेण[४८] विलक्षणसामग्रीविवक्षायाः दीधितिकृता वक्ष्यमाणाया गदाधरभट्टाचार्यैः निर्वक्ष्यमाणाया असङ्गतिप्रसङ्गात् तादृशशाब्दसामग्र्या ज्ञानपदजन्योप-स्थितितात्पर्यज्ञानादिनिरूपिततज्ज्ञानविषयताप्रयोज्यतज्ज्ञानविषयताक-शाब्दात्मकग्रहजनकतया निरुक्तज्ञानग्राहकत्वासम्भवात्। समनन्तर-मेवैतन्निरूपयिष्यामः। प्रथमविप्रतिपत्तिपक्षस्यैव तत्रानुषञ्जनीयत्वात्। किञ्च तज्ज्ञानग्राहकत्वव्यापकविषयिताप्रतियोगितामात्रस्यैव सम्यक्त्वेन तज्ज्ञानग्रहजनकसामग्रीजन्यग्रहत्वेन तज्ज्ञानग्रहनिवेशवैयर्थ्यमाशङ्क्य[४९]

---

४८. इदं घटत्वप्रकारकमित्यादि - प्र.वा-पृ.सं.३३

४९. वैयर्थ्यमाशङ्क्येति - पृ.सं.२३

अयंभावः यद्यपि तदप्रामाण्याग्राहकजन्यस्वाश्रयज्ञानग्रहत्वव्यापकविषयिता निरूपकत्वनिवेशेनैव सामाञ्जस्ये तादृशज्ञानग्रहजनकसामग्रीजन्यग्रहत्वेन तज्ज्ञानग्रहनिवेशवैयर्थ्यं प्रसजति, तथापि ज्ञानग्रहत्वसमानाधिकरणात्यन्ता-

यथासन्निवेशेऽवैयर्थ्यमिति भवद्भिरेवोक्तं प्रामाण्यपक्षकत्वं परित्यज्य[५०] व्यत्यासश्च भवद्भिरेव कृतं इति व्याघातः। तस्मात् न प्रतियोगितासामान्यपक्षकविप्रतिपत्तिपरिष्करणं गदाधरभट्टाचार्याणां युक्तमितिदिक्।

अप्रमाण्यपदार्थविचारः

अविघ्नमस्तु। ननु तदप्रामाण्याग्राहकत्वदले अप्रामाण्यपदेन[५१] प्रमात्वाभावविवक्षणे भ्रमत्वग्राहकसामग्र्या प्रामाण्याग्रहात् बाधः भ्रमत्वादिविवक्षणे च प्रमात्वाभावग्राहकसामग्र्या तदग्रहात् बाध इत्याशङ्क्य अप्रामाण्यपदेऽपि विरोध्यर्थकतामुपगम्य परिष्करोति।

अप्रामाण्यमिह प्रामाण्य विरोधि विवक्षितम्।
भ्रमत्वादि प्रमात्वस्याभावश्चैवं ग्रहीष्यते॥ ८॥

अष्टमश्लोकविवरणम्

अप्रामाण्यम् - अप्रामाण्यपदप्रतिपाद्यम्। इह - विप्रतिपत्तिवाक्ये घटकत्वं सप्तम्यर्थो प्रामाण्यपदेन्वेति। प्रामाण्येति प्रामाण्यविरोधित्वं न प्रामाण्यासामानाधिकरण्यं घटोभयविषयके इमौ घटाविति ज्ञाने घटत्वाभाववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वादिरूपभ्रमत्वस्य घटत्ववतिघटत्वप्रकारकत्वरूपप्रमात्वसामाधिकरण्येन भ्रमत्वासंग्रह-प्रसङ्गात्। किन्तु तत्तत्प्रामाण्यावच्छेदकावच्छिन्नतत्तत्प्रामाण्याश्रय-

---

भावप्रतियोगित्वाभावरूपज्ञानग्रहत्वव्यापकत्वापेक्षया तादृशसामग्रीजन्य-ग्रहत्ववन्निष्ठाभावप्रतियोगित्वाभावरूपतादृशसामग्रीजन्य ग्रहत्वव्यापकत्वस्य भिन्नत्वात् अखण्डाभावघटकतया न वैयर्थ्यमिति भट्टाचार्यैः उक्तमिति भावः।

५०. व्यत्यासश्चेति - तादृशग्रहनिष्ठात्यन्ताभावप्रतियोगितात्वावच्छिन्नस्य पक्षीकरणमित्यर्थः।

५१. अप्रामाण्यपदेनेति - प्र.वा-पृ.सं.२८

निष्ठाधिकरणताकान्यत्वम्। तथाच घटत्वाभाववति घटत्वप्रकारकत्वादि-रूपभ्रमत्वस्योक्तभ्रमनिष्ठाधिकरणता न घटत्ववतिघटत्वप्रकारकत्वावच्छेदकघटावच्छिन्ना तदनच्छेदकघटावच्छिन्नत्वात्। अतस्तस्य घटत्ववतिघटत्वप्रकारकत्वविरोधित्वं इति भावः।

ननूक्तरीत्या घटप्रामाण्यविरोधित्वं घटत्ववद्विशेष्यकत्वावच्छिन्न घटत्वप्रकारकत्वावच्छेदकावच्छिन्नघटत्ववति घटत्वप्रकारकत्ववन्निष्ठाधिकरणाताकान्यत्वं पर्यवस्यति। तच्च नोपपद्यते। घटज्ञानग्राहक सामग्र्या ज्ञानत्वाग्राहिकाया विरोध्यग्राहकत्वासम्भवात्। ज्ञानत्वस्य तथाविध विरोधित्वसत्त्वात्। न च तदधिकरणतायाः पटज्ञानादिनिष्ठाया घटाद्यनवच्छिन्नत्वेपि घटज्ञाननिष्ठायास्तस्याः घटावच्छिन्नतया न तस्य निरुक्तविरोधितासम्भव इति वाच्यम्। जातेः ज्ञानत्वस्य व्याप्यवृत्तितया तदधिकरणतायाः अवच्छेदकाभावेन उक्तविरोधित्वास्यानपायात् इति चेन्न। तदवच्छेदकावच्छिन्नेत्यस्य तदवच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्तायां तात्पर्यात्[५२]। निरुक्तज्ञानत्वाधिकरणतायां अवच्छिन्नत्वा-

५२. तात्पर्यादिति प्र.वा-पृ.सं. २८ - तथा च प्रमात्वावच्छेदकानवच्छिन्नत्व, अवच्छिन्नत्वोभयाभाववती प्रमानिष्ठा यद्यद्व्यक्तिनिरूपिताधिकरणता, तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वं प्रमात्वविरोधित्वमिति पर्यवस्यति। ज्ञानत्वनिरूपितप्रमानिष्ठाधिकरणतायाः व्याप्यवृत्तितया प्रमात्वावच्छेदकीभूतघटत्ववद्विशेष्यकत्वाद्यनवच्छिन्नत्वसत्त्वेऽपि अवच्छिन्नत्वविरहेण उभयाभावस्य सत्त्वात् यद्व्यक्तिपदेन ज्ञानत्वस्य ग्रहीतुं शक्यत्वात् न तस्य प्रमात्वविरोधित्वम्।
अत्र अवच्छिन्नत्वाभावमात्रनिवेशे घटत्ववतिघटत्व प्रकारकत्वरूपप्रमात्वस्यापि प्रमात्वविरोधित्वापत्तिः, प्रमानिष्ठायां तदधिकरणतायां अवच्छिन्नत्वस्यैव सत्त्वात्, अतस्तद्वारणाय अभावप्रतियोगितया प्रमात्वावच्छेदकानवच्छिन्नत्वोपादानम्। तदवच्छेदकघटत्ववद्विशेष्यकत्वावच्छिन्नत्वस्यैव प्रमात्वनिरूपिताधिकरणतायां सत्त्वेन तदनवच्छिन्नत्वाभावप्रयुक्तोभयाभावस्य

भावेन तत्प्रयुक्तोभयाभाववत्ताया अक्षतत्त्वात् । अवच्छिन्नत्वाभाववत्तत्प्रामाण्याश्रयनिष्ठाधिकरणताकान्यत्वमात्रोक्तौ प्रमात्वेऽतिप्रसङ्ग इत्यभावप्रतियोगितयानवच्छिन्नत्वोपादानं ज्ञानत्ववारणायावच्छिन्नत्वोपादानमिति स्फुटमेव प्रमात्वाभावावच्छेदकतया गृह्यमाणायां घटत्वादेः प्रामाण्यविरोधिनो घटादिनिष्ठाधिकरणतायां उभयाभावसत्त्वात तत्संग्रहः । [५३]अतः प्रामाण्याश्रयनिष्ठत्वोपादानमिति ।

अप्रमाण्यपदार्थनिष्कर्षपूर्वकम् अप्रामाण्याग्राहकत्वनिष्कर्षः

नन्वेवमपि प्रमायां कालिकविशेषणतया या घटत्वादेरधिकरणता तस्याः घटरूपप्रामाण्यावच्छेदकदेशावच्छिन्नत्वादनवच्छिन्नत्वाभावेनोभयाभाववत्वात् घटत्वाद्यसंग्रहतादवस्थ्यम् । नच कालिकविशेषणतानवच्छिन्नत्वमधिकरणतायां निवेश्यत इति वाच्यम् । निरूपकत्वसम्बन्धेन पुरोवर्तिविशेष्यकत्वादिलक्षणविषयितायाः स्वसमवायित्वादिसम्बन्धेन सत्तादेश्च प्रमात्वाभावावच्छेदकत्वस्य निर्विवादतया तयोः प्रमानिष्ठाधिकरणतयोः प्रमात्वावच्छेदक घटावच्छिन्नत्व निरच्छिन्नत्वयोस्सत्वेन निरुक्तोभयाभाववत्प्रमानिष्ठाधिकरणताकान्यत्वलक्षणविरोधित्वाभावेन निरूपकत्वादिसम्बन्धेन

सत्त्वात् न दोषः ।

एवं तन्मात्रस्य प्रतियोगितया उपादाने ज्ञानत्वस्य प्रमात्वविरोधितापत्तिः, प्रमानिष्ठतादृशधिकरणतायां प्रमात्वावच्छेदकानवच्छिन्नत्वाभावस्य असत्त्वेन यत्पदेन ज्ञानत्वस्य धर्तुमशक्यत्वादतः अवच्छिन्नत्वस्यापि प्रतियोगितया उपादानमिति भावः ।

५३. प्रामाण्याश्रयनिष्ठत्वोपादानमिति – अत्र 'केवलभ्रमनिष्ठभ्रमत्वाद्याधिकरणतायाः उभयाभाववत्त्वात् भ्रमत्वादेः प्रामाण्याविरोधित्वापत्तिः तादृशभ्रमत्वाद्यधिकरणता न क्वचिदपि प्रमायाम्, तादृश भ्रमत्वादौ तदापत्तिरिति प्रमानिष्ठेति' इति कृष्णम्भट्टीयम् ।

तद्वत्ताग्राहकसाग्र्या विरोध्यग्राहिकया प्रामात्वाग्रहात् बाधापत्ते-स्तथा[५४]प्यनिवारणात्।

यदि च तन्निर्वाहाय घटत्ववति घटत्वप्रकारकत्वावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्तदाश्रयनिष्ठयद्यत्सम्बन्धावच्छिन्नाधिकरणताकान्यो योयः तत्तत्सम्बन्धावच्छिन्न तत्तनिष्ठप्रकारताकग्रहाजनकत्वमग्राहकांन्तार्थः परिष्क्रियते तेन पुरोवर्तिविषयितादिमत्ताग्रहमादाय न बाधः[५५]। निरूपकतासम्बन्धावच्छिन्नतदधिकरणतायाः

---

५४. तथाप्यनिवारणादिति। अंयमत्राशयः - प्रमात्वावच्छेदकानवच्छिन्नत्व अवच्छिन्नत्वोभयाभावत्प्रमानिष्ठाधिकरणतायां कालिकविशेषणतासम्बन्धानवच्छिन्नत्वनिवेशेऽपि बाधः दुर्वारः। तत्र हि प्रमापदेन पुरोवर्तिविशेष्यकं घटत्वप्रकारकं ज्ञानमित्याकारकप्रमा गृह्यते। इयं यद्यपि अप्रमात्ववति अप्रमात्वप्रकारकत्वेन प्रमात्मकं, तथापि पुरोवर्तिविशेष्यकत्वावच्छेदेन अस्या प्रमात्वाभावोऽपि वर्तते एव। अवच्छेद्याधिकरणसम्बन्धिनः एव अवच्छेदकत्वमितिन्यायेन प्रमात्वाभावाधिकरणे तादृशप्रमायां पुरोवर्तिविशेष्यकत्वलक्षणविषयितायाः निरूपकतासम्बन्धेन वर्तमानतया प्रमात्वाभावावच्छेदकत्वं तावदविवादम्। ततश्च प्रमानिष्ठतादृशविषयिता निरूपिताधिकरणतायां घटत्ववद्विशेष्यक घटत्वप्रकारकत्वरूपप्रमात्वावच्छेदकघटावच्छिन्नत्वं वर्तत इति तदनवच्छिन्नत्वाभावात् उभयाभावः। सत्तानिरूपितप्रमानिष्ठाधिकरणताया मवच्छिन्नत्वाभावादुभयाभावः। एवं च तयोः प्रामाण्यविरोधित्वं न स्यादिति विरोध्यग्राहिकया तत्स्थलीय सामग्र्या प्रामाण्यं न ग्राह्यमिति बाधः।

५५. न बाध इति - पुरोवर्तिविशेष्यकम् घटत्वप्रकारकं ज्ञानम् इति प्रमानिष्ठायाः निरूपकत्वसम्बन्धावच्छिन्नतादृशविषयितानिरूपिताधिकरणतायाः घटत्ववति घटत्वप्रकारकत्वरूपग्राह्यप्रामाण्याश्रयप्रमावृत्तित्वाभावात् अधिकरणतापदेन सा ग्रहीतुं न शक्यते, किन्तु तादृशाधिकरणताकान्यः पुरोवर्ति विशेष्यकत्वाख्यो धर्मो भवति। अतः तस्य विरोधित्वमेवायाति। तादृशानुव्यवसायनिष्ठविषयितानिरूपितनिरूपकत्व सम्बन्धावच्छिन्नाधिकरणता पुरोवर्तिविशेष्यकघटत्व-

प्रकृतप्रमावृत्तित्वाभावात् अनुव्यवसायादिनिष्ठविषयितान्यतरनिरूपित-निरूपकत्वसम्बन्धावच्छिन्नाधिकरणतायां व्यवसायनिष्ठायामेव तादृशोभयाभावसत्वात्। एवं च घटत्वादेः कालिकविशेषणतया प्रकृत-प्रमावृत्तितेपि समवायेनावृत्तित्वादेव तद्दोषपरिहारः सम्भवति इति कालिकविशेषणतानवच्छिन्नत्वं न दीयत इति विभाव्यते। [५६]तथापि स्वसमवायिसमवायित्वसम्बन्धेन प्रमात्वाभावावच्छेदकस्य सत्तादेरसंग्रहतादवंथ्यम्। घटज्ञानादिनिष्ठायाः स्वसमवायि समवायित्वसम्बन्धावच्छिन्नाधिकरणताया अप्रसिद्धत्वात्।

अत्रेदं प्रतिविदध्महे। घटत्ववतिघटत्वप्रकारकत्वावच्छेदकान-वच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्तद्वृत्त्यधिकरणता[५७]सामान्ये

प्रकारकव्यवसायनिष्ठा तथा च प्रमात्वावच्छेदकघटावच्छिन्नेति तदनवच्छिन्नत्वाभावप्रयुक्तोभयाभाववतीति तस्य विरोधित्वं वक्तुं न शक्यते इति तादृशानुव्यवसायसामग्र्या प्रामाण्यं गृह्यत इति न दोषः। यद्यत्सम्बन्धा-वच्छिन्नत्वस्याधिकरणतायां निवेशेन कालिकविशेषणतानवच्छिन्नत्वं तत्र न देयम् इत्याह - एवं च घटत्वादेरिति।

५६. तथापीति - स्वं सत्ता तत्समवायि गुणादिकं, तत्समवायः घटादौ इति तादृशपरंपरा सम्बन्धेन सत्तायाः प्रमात्वाभावावच्छेदकत्वम्। घटनिष्ठप्रमात्वाभावस्य सत्ता अवच्छेदिकेत्यर्थः। घटज्ञानादिनिष्ठाधिकरणता तादृशाधिकरणतापदेन न स्वीकार्येति वक्तव्यम्। प्रकृते प्रामाण्याश्रयज्ञानं घटज्ञानं तत्र स्वसमवायिसमवाय सम्बन्धावच्छिन्नाधिकरणता अप्रसिद्धेति तादृशाधिकरणंताकान्यत्वं सत्तायां वक्तुं न शक्यम्।

५७. अधिकरणतासामान्ये इति - अत्र सामान्यपदानुपादाने प्रमात्व, ज्ञानत्वादेः विरोधितापत्तिः। घटत्वप्रकारकत्वावच्देदकानवच्छिन्नत्व, अवच्छिन्नत्वोभया-भाववत्तद्वृत्त्यधिकरणतापदेन प्रमात्वनिरूपिताधिकरणता स्वीक्रियते तत्र ज्ञानत्वनिरूपितत्वाभावप्रयुक्तोभयाभावस्य सत्वात् अतिप्रसङ्गः। सामान्य-पदोपादानेतु तादृशाधिकरणतासामान्यान्तर्गतज्ञानत्वनिरूपिता-धिकरणतायां ज्ञानत्वनिरूपितत्वाभावप्रयुक्तोभयाभावस्यासत्वात् न दोषः।

यन्निरूपितत्व यत्सम्बन्धावच्छिन्नत्वोभयाभावः तत्सम्बन्धावच्छिन्नतन्निष्ठ स्वाश्रयविशेष्यतानिरूपितप्रकारताकग्रहाजनकत्वमग्राहकान्तार्थः। निरुक्तोभयाभाववतीषु यावतीषु प्रमात्ववन्निष्ठाधिकरणतासु स्वसमवायिसमवायित्वसम्बन्धावच्छिन्नत्व सत्तानिरूपितत्वोभयाभावस्य सत्वात् तत्सम्बन्धावच्छिन्नतन्निष्ठप्रकारताया निरुक्तप्रामाण्य विरोधिप्रकारतात्वसंगतिः। प्रमात्वज्ञानत्वप्रभृत्यविरोधिधर्माणां प्रमात्वावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववतीषु ज्ञानत्व प्रमात्वादिनिरूपिताधिकरणतासु स्वरूपसमवायादिसम्बन्धावच्छिन्नत्व तन्निरूपितत्त्वोभयाभावसत्त्वात् अतिप्रसङ्गवारणाय सामान्यपदम्। तथा च तादृशाधिकरणतासामान्यान्तर्गतस्य स्वनिरूपितस्वरूपसमवायादि सम्बन्धावच्छिन्नाधिकरणतासु तत्तत्सम्बन्धावच्छिन्नत्वतत्तन्निरूपितत्व-योरुभयोरेव सत्त्वान्नातिप्रसङ्गः। नचैवमपि निरुक्ताधिकरणतासामान्ये संयोगादिसम्बन्धावच्छिन्नत्व ज्ञानत्वादिनिरूपितत्वयोरपि विरहसत्त्वात् ज्ञानत्वप्रमात्वयोरपि विरोधित्वप्रसङ्ग इति वाच्यम्। स्वसमवायि-समवायित्वादिसमानाधिकरणसम्बन्धेनेव तादृशव्यधिकरणसम्बन्धेन ज्ञानत्वादिनिष्ठानां प्रकारतानां विरोधिप्रकारतात्वेपि समवायस्वरूपादि-सम्बन्धावच्छिन्नप्रकारतानां विरोधिप्रकारतात्वप्रसङ्गाभावेन सिद्धान्त-सामञ्जस्यात्।

अथस्यात्। गुरुमते निरुक्तप्रामाण्याश्रयनिष्ठविशेष्यतानिरूपित प्रामाण्यविरोधिनिष्ठप्रकारताकग्रहाप्रसिद्धिः। अन्यथाख्यातेरनङ्गीकारात्।

गुरुमते विभिन्नज्ञानीयविषयतयोः निरूप्यनिरूपकभावः न स्वीकार्य इति प्रतिपादनम्

यत्तु - गुरुमते विभिन्नज्ञानगोचरयोरपि धर्मधर्मिणोः विशेषण-विशेष्याभावाभ्युपगम इति गदाधरभट्टाचार्यैरुक्तम्[५८]। तत्रेदं वक्तव्यम्।

५८. भट्टाचार्यैरुक्तमिति - प्र.वा-पृ.सं. ३१

किमिह ग्रहणस्मरणगोचरयोर्विशेष्यविशेषणभावो वास्तविको वैज्ञानिको वा अभिमत इति भवद्भिरुच्यते। नाद्यः। प्रकृतानुपयोगात्। तदनाश्रितस्य विशेषणताया वास्तविक्यासिद्धेश्च। न द्वितीयः। [५९]अपसिद्धान्तात्। अन्यथा रजतत्वप्रकारतानिरूपितज्ञानीयविशेष्यता अरजतवृत्तिरित्याद्य-न्यथाख्यात्यनुमानानां सिद्धसाधनाद्युपघातप्रसङ्गात्। दूषणान्तर-कथनानुपपत्तिप्रसङ्गाच्च। किञ्च। तदङ्गीकारेऽपि तादृशप्रकारता-विशेष्यतयोः [६०]उभयनिरूप्यत्वं एकैकनिरूप्यत्वं वा। नाद्यः। उभयोरन्यथाख्यातित्वप्रसङ्गात्। द्वितीयेपि प्रामाण्याश्रयनिष्ठविशेष्यता-निरूपिततद्विरोधिनिष्ठप्रकारताकत्वेनग्रहोनिवेश्यते उत प्रामाण्यविरोधि-प्रकारतानिरूपिततदाश्रयनिष्ठविशेष्यताकत्वेन। नाद्यः। [६१]तथाविध-जनिकयानुभवसामग्र्या प्रामाण्याग्रहात् बाधस्य तदवस्थत्त्वात्। न द्वितीयः। तदप्रामाण्याग्राहकत्वतः तव तदप्रतीतेः। तत्पदोत्तरलुप्तसप्तम्यर्थविशेष्यताया अप्रामाण्यपदोत्तर लुप्तषष्ठ्यर्थप्रकारताश्रयद्वारा ग्रह्यर्थान्वयस्य तस्मिन्न-प्रामाण्यस्याग्राहकेति व्युत्पत्या साधितत्वात्। तस्य अप्रामाण्येन अप्रमात्वेन अग्राहिकेतिव्युत्पत्या तृतीयार्थप्रकारतान्वितषष्ठ्यर्थ-

---

५९. अपसिद्धान्तादिति - अयं भावः - गुरुमते यदि ग्रहणस्मरणगोचरयोः विशेषणविशेष्यभावः वैज्ञानिकः स्वीक्रियते, तदा रजतत्वप्रकारतानिरूपित ज्ञानीयविशेष्यता अरजतवृत्तिरिति तार्किकोक्तानुमाने सिद्धसाधनं दोषः। भिन्नज्ञानीयविषयतयोः निरूप्यनिरूपकभावाङ्गीकारे तस्यां विशेष्यताया मरजतवृत्तित्वस्य सिद्धत्वात्।

६०. उभयनिरूप्यत्वम् - स्मरणग्रहणरूपज्ञानद्वयनिरूप्यत्वम् इत्यर्थः। उभयोरिति ग्रहण स्मरणयो रित्यर्थः। ज्ञानद्वयेऽपि रजतत्वप्रकारता - अरजतविशेष्यता निरूपकत्वरूपान्यथाख्यातित्वसत्वात्।

६१. तथाविधस्मरणाजनिकया- प्रामाण्यविरोधिग्राहिका स्मरणसामग्री, तद्भिन्नया अनुभवसामग्र्येत्यर्थः।

विशेष्यताया ग्रंह्यर्थान्वयेन तत्प्रतीत्युपपादने तदिति लुप्तसप्तमीकं[६२] इति शिरोमणिग्रन्थ विरोधात् । तद्विवरण[६३] प्रकरणस्थाव्यवहितस्वग्रन्थ-विरोधाच्चेति ।

अत्र दीधितिकृतः - अप्रामाण्यग्रहः । इदं ज्ञानमप्रमेति व्यवहार-जनकोग्रहः । स च मिश्रादिमते विशिष्टज्ञानम् । गुरुणां[६४] तु स्वातन्त्र्येणोपस्थिता प्रामाण्यस्यधर्मिज्ञानमिति । अयं भावः । प्रामाण्याश्रयनिष्ठविशेष्यतानिरूपितप्रामाण्यविरोधिनिष्ठप्रकारताक-विसंवादीछाप्रवृत्त्यादिकिञ्चिद्व्यवहारजनकग्रहाजनकत्वमग्राहक-दलान्तार्थः । भ्रमानङ्गीकारेपि विसंवादीछाप्रवृत्त्यादेरङ्गीकारान्न-गुरुमतासंग्रहः । स्वातन्त्र्येण अन्याप्रकारत्वेन उपस्थितं स्मरणविषयीकृतं अप्रामाण्यं प्रामाण्यविरोधि येन तथाविधस्यपुरुषस्य धर्मिज्ञानंग्रहणं इति गुरूणामित्यादिग्रन्थस्यार्थः ।

यत्तु - स्वतंन्त्रोपस्थिताप्रामाण्यनिरूपितज्ञानरूपधर्मिनिष्ठ-

---

६२. तदिति लुप्तसप्तमीकम् - प्र.वा-पृ.सं.३१

६३. स्वग्रन्थविरोधाच्च। स्वग्रन्थः - तस्याप्रामाण्यं तदप्रामाण्यम् इति षष्ठ्यन्तार्थस्य प्रामाण्येनान्वयात् तदीयप्रामाण्यविरोधि पर्यवसितम् इति मिश्रव्याख्यायां निष्प्रकारकत्वादेः सकलप्रामाण्यविरोधितया उक्तदोषाद्धारासंभवात् सप्तमी समासाभिप्रायेणाह (लुप्तसप्तमीकम् इति) गदाधरग्रन्थः - अव्यवहितस्वग्रन्थः - अव्यवहितपूर्वः ग्रन्थः ।

६४. प्र.वा-पृ.सं.३१
गुरूणां तत् स्वातन्त्र्येणाप्रामाण्योपस्थितौ धर्मिज्ञानम् इति दीधिति पाठः एतैः ग्रन्थकारैः स्वातन्त्र्येणोपस्थितप्रामाण्यस्य धर्मिज्ञानम् इति पाठ आदृतः। तदनुसारेणार्थो वर्णितश्च ।

विशेष्यतानिरूपकं यज्ज्ञानगोचरानुभवरूपम् ज्ञानान्तरं तदित्यर्थइति[६५] गदाधरभट्टाचार्यैरुक्तं ।

तत्तु व्याहतम् । स्वातन्त्र्येणोपस्थितस्यविशेष्यतानिरूपकत्वा-सम्भवात् । विशेष्यतानिरूपकत्वेअन्यप्रकारतापत्यास्वतन्त्र्यायोगात् । तज्ज्ञानभिन्नज्ञानविषयत्वस्यस्वातन्त्र्यपदात् अप्रतीतेः । [६६]अत एव घटस्मरणपटानुभवमेळनेघटत्वस्य न स्वतन्त्रोपस्थितत्वव्यवहारः ।

ननु एवमपि गुरुमतासंग्रहः घटत्ववतिघटत्वप्रकारकत्वस्यपक्षत्वे तदवच्छेदकघटानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्तदाश्रय निष्ठाधिकरणतासामान्येज्ञानत्ववतिज्ञानत्वप्रकारकत्वनिरूपितत्वस्वरूप-सम्बन्धावच्छिन्नत्वोभयाभावसत्वात् ज्ञानत्ववति ज्ञानत्वप्रकारकत्वस्य घटत्ववति घटत्वप्रकारकत्वविरोधित्वं[६७] तावदविवादं तथाच तन्मते ज्ञानत्ववति ज्ञानत्वप्रकारकत्वस्यापि व्यवसायनिष्ठत्वात् तेनैव ग्राह्यत्वावश्यंभावेन स्वप्रकाशसामग्र्याविरोध्यग्राहकत्वाप्रसिद्धेः । न च तज्ज्ञाननिष्ठं यद्यत्प्रामाण्यं तस्य सर्वस्यापि तन्निष्ठप्रमात्वत्वेनानुगमं कृत्वा-

---

६५. प्र.वा-पृ.सं.३२ - अयं तत्र ग्रन्थः - स्वातन्त्र्येणेति स्वतन्त्रोपस्थिताप्रामाण्य प्रकारतानिरूपितधर्मिनिष्ठविशेष्यतानिरूपकतज्ज्ञानगोचरानुभवरूपज्ञानान्तरम् इत्यर्थः इति ।

६६. अतएवेति - अयं भावः - घटस्मरणपटानुभवमेलने घटत्वं स्वातन्त्र्येण उपस्थितमिति व्यवहारः न, तत्र घटत्वस्य इतरविशेषणत्वेनोपस्थितत्वात् ।

६७. घटत्ववतिघटत्वप्रकारकत्वविरोधित्वं तावदविवादम् - कथं विरोधित्वं ज्ञानत्ववति ज्ञानत्वप्रकारकत्वे इति तु न शङ्क्यम् । घटत्वघटित-प्रामाण्यावच्छेदकघटानवच्छिन्नत्वस्य तत्प्रामाण्याश्रयनिष्ठाधिकरणता-सामान्येऽभावः इष्टः । गुरुमते हि ज्ञानत्वघटितप्रामाण्यनिरूपिताधिकरणता घटत्वघटितप्रामाण्यनिरूपिताधिकरणतायामिति उभयाभावस्तत्र भवति। तथा च तादृशप्रामाण्यस्य पक्षीभूतप्रामाण्यविरोधित्वमिति स्वप्रकाशसामग्र्या विरोध्यग्राहकत्वं दुर्वचमिति पूर्वपक्षः ।

तदवच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्तज्ज्ञाननिष्ठाधिकरणता-सामान्येइतिविवक्षणे नोक्तदोष इति वाच्यम्। तथासति [६८]इमौ घटौ अयं पटइति पटद्वयविषयकज्ञाने घटत्वभ्रमत्वस्य तन्निष्ठपटत्ववतिपटत्व-प्रकारकत्वरूपप्रमात्वावच्छेदकपटावच्छिन्नतन्निष्ठाधिकरणताकतया घटत्ववतिघटत्वप्रकारकत्वस्य पक्षत्वे मिश्रमते तादृश भ्रमत्वाव-गाहिन्यानुव्यवसायसामग्र्या ग्राह्यत्वाभावेन बाधापत्तेः। प्रमात्वस्य तत्तत्प्रकारभेदेन भिन्नतयानुगमासंभवाच्च। तज्ज्ञाननिष्ठानां तेषामन्यतमत्वेन अनुगमसंभवेपि घटज्ञानोभयविषयके घटाविति ज्ञाने घटत्वभ्रमत्वस्य तदन्यतमज्ञानत्ववति ज्ञानत्वप्रकारकत्वावच्छेदकावच्छिन्नतयाऽसंग्रह-प्रसङ्गाच्च।

एतेन[६९] तज्ज्ञाननिष्ठयत्प्रमापदशक्यतावच्छेदकतावच्छेदक-तापर्याप्तिमत् तदवच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभावो-विवक्षणीयः। तत्तद्धर्मघटित तद्वतितत्प्रकारकत्वविशिष्टज्ञानत्वादि-प्रमापदशक्यतावच्छेदकतावच्छेदकत्वं केवलान्वयीति तज्ज्ञाननिष्ठत्वं निवेशितम्। [७०]न च गुरुमते एकत्राऽनेकप्रामाण्यसत्वेनोक्तविवक्षायाः

---

६८. तथासति 'इमौ घटौ अयंपट' इति - पटद्वयविषयकज्ञाने घटत्वभ्रमत्वमवगाह्यते। यदि तज्ज्ञाननिष्ठप्रमात्वत्वेन प्रमात्वानुगमः क्रियते तदा प्रमात्वपदेन पटत्वघटितं स्वीक्रियते। तदवच्छेदकपटावच्छिन्नत्वमेव घटत्वभ्रमत्वनिरूपिताधिकरणतायां वर्तते, एवं च घटत्वभ्रमत्वनिरूपितत्व तत्सम्बन्धावच्छिन्नत्वोभयाभावस्य पटद्वयविषयकज्ञाननिष्ठायां घटत्वभ्रमत्वनिरूपिताधिकरणतायामभावात् तस्य विरोधित्वानुपपत्तिरित्यर्थः। तथा च बाधः।

६९. एतेनेति - घटज्ञानोभयविषयके घटावितिज्ञाने घटत्वभ्रमत्वस्य विरोधित्वेनासंग्रह प्रसङ्गेनेत्यर्थः।

७०. न च गुरुमते एकत्रानेकप्रामाण्येति - व्यवसायस्य स्वप्रकाशतया तत्र घटत्ववति घटत्वप्रकारकत्वमपि वर्तते, ज्ञान[illegible]वति ज्ञानत्वप्रकारकत्वमपि वर्तत इति

आवश्यकत्वेऽपि मिश्रमते गौरवं लाघवेन तत्तत्प्रामाण्यस्य प्रातिस्विकरूपेणोपादानसम्भवादिति वाच्यम् । तन्मतेप्यनुव्यसायादि-निष्ठस्य ज्ञानत्ववति ज्ञानत्वप्रकारकत्वादेः पक्षत्वे तत्रैवात्मत्ववतितत्प्रकार-कत्वादीनां सत्वेन अनुव्यसायानुव्यवसायेनैव तेषां सर्वेषां ग्राह्यतया तत्सामग्र्या विरोध्यग्राहकत्वस्योक्तविवक्षामन्तरेण दुरुपपादत्वादित्यपिनिरस्तम् । तस्मान्निरुक्ताप्रामाण्याग्रहकत्वं न युक्तमितिचेत् ।

अप्रमाण्याग्राहकत्वनिष्कर्षसमर्थनम्

अत्रोच्यते । गुरुमतेऽपि घटत्ववति घटत्वप्रकारकत्वमेव स्वग्राह्यमास्थीयते, न[७१] तु ज्ञानत्ववति ज्ञानत्वप्रकारकत्वादिकमपि तन्निष्ठानां सर्वेषां तद्ग्राह्यत्वे प्रामाण्यप्रामाण्यादिकमादायान[७२]-वस्थाप्रसङ्गात् । मिश्रैरनुव्यवसायेन यत्प्रामाण्यं गृह्यते गुरुभिः स्वप्रकाशेनतदेवगृह्यतेइतिहिमर्यादा । एवं मिश्रमतेऽप्यनु-व्यवसायानुव्यवसायेन ज्ञानत्ववतिज्ञानत्वप्रकारकत्वादिकमेवगृह्यते नत्वात्मत्ववतितत्प्रकारकत्वमपि मामहंजानामीत्यनुव्यवसायान्तरेणैव तस्यग्राह्यत्वाङ्गीकारात् । [७३]स्वीयज्ञाननिष्ठलौकिकविषयतानिरूपित

स्वप्रकाशसामग्रया घटत्वघटितप्रमाण्यविरोधि - ज्ञानत्वघटित प्रामाण्यविरोध्यग्राहकत्वाप्रसिद्धिरिति पूर्वोक्तदोषः स्मार्यते ।

७१. न तु ज्ञानत्ववति ज्ञानत्वप्रकारकत्वादिकमपीति - इति - एवं च तस्य घटत्व घटितप्रामाण्यविरोधित्वेऽपि तदग्राहकत्वं स्वप्रकाशसामग्रयां संभवति इति नाप्रसिद्धिः ।

७२. अनवस्थाप्रसङ्गात् इति-व्यवसाये यथा घटत्वघटितप्रामाण्यं वर्तते तथा प्रामाण्यं घटितप्रमाण्यमपि वर्तते तन्मते, अतः अनवस्थाप्रसङ्गः इति भाव इति भाति।

७३. स्वीयेति - आत्मत्ववति आत्मत्वप्रकारकत्वं नानुव्यवसायानुव्यवसायेन मिश्रमते गृह्यते । स्वीयज्ञाननिष्ठलौकिकविषयता - अनुव्यवसायनिष्ठा, तन्निरूपित

विषयितासम्बन्धावच्छिन्नावच्छेदकतावच्छेदकघटितप्रमाण्यस्यैव ज्ञानप्रत्यक्षविषयतेति मिश्रमेतत्सिद्धान्तात्। यद्यप्यनुव्यवसायानुव्यवसायेन घटत्वप्रकारकत्ववति घटत्वप्रकारकत्वप्रकारकत्वमपि गृह्यते । तथा गुरुमतेनीलोघट इत्यादि व्यवसाये नीलत्ववति नीलत्वप्रकारकत्वमपि [७४]गृह्यते । तदनुव्यवसायेन मिश्रमतेपि तथैव गृह्यते । तथापि एकावच्छेदकावच्छेद्यत्वात् सर्वेषां [७५]नैकतरपक्षानुमितिस्थले तदन्यस्य विरोधित्वप्रसङ्ग इत्यादि सूक्ष्ममीक्षणीयम्।

सामग्रीपदसार्थक्य यावत्पदसार्थक्ययोः विचारः

अत्र घटत्ववति घटत्वप्रकारकत्वं स्वाश्रयग्राहकजन्य ग्रहनिष्ठाभावीयनिरुक्तान्यतरविषयितासम्बन्धावच्छिन्नप्रतियोगित्वाभाववत्वेतीत्युक्तावप्रसिद्धिः। तादृशशरीरादिजन्यज्ञानान्तरे सर्वेषामेवोक्तान्यतरविषयितासम्बन्धेनाभावसत्त्वात् । निरुक्त प्रतियोगित्वस्य केवलान्वयित्वात् । अतस्सामग्रीपदम् । यद्यपि सामग्रीपदस्य यावत्कारणपरतया तत्तत्प्रमाण्याश्रयनानाज्ञानग्रहजनक तत्तज्ज्ञानतत्सन्निकर्षादिसकलकारणजन्यताया ज्ञप्त्यनुव्यवसायादावसत्त्वादप्रसिद्धिः[७६] । तथापि स्वाश्रयग्रहोत्पत्ति प्रयोजकतावच्छेदका-

---

विषयिता, सम्बन्धावच्छिन्नावच्छेदकता व्यवसाये, तदवच्छेदकता ज्ञानत्वे इति तद्घटितं प्रामाण्यमेव ज्ञानप्रत्यक्षलौकिकविषयः । अनुव्यवसायेन तु घटत्वादिघटितं गृह्यते इति विशेषः।

७४. गुरुमते नीलो घट इति। न च नीलो घट इति कथं व्यवसायः तन्मते, किन्तु नीलं घटं जानामीत्येव स इति वाच्यम्, नीलो घटः, नीलं घटं जानामीति व्यवसायस्य तन्मते इष्टत्वात्। तत् मनसि निधाय एवं कथितम्।

७५. एकतरपक्षानुमितिस्थले इति घटत्वघटितप्रामाण्यस्य पक्षत्वे ज्ञानत्वघटितप्रामाण्यस्य न विरोधित्वप्रसङ्गः इत्यर्थः।

७६. प्र.वा-पृ.सं. २६

वच्छिन्नप्रयोज्योत्पत्तिकग्रहनिष्ठाभावप्रतियोगित्वाभावस्य विवक्षणान्ना-नुपपत्तिः। तत्तदनुव्यवसायाद्युत्पत्तिप्रयोजकतावच्छेदकतत्तद् व्यक्त्युप-धायककारणस्तोमनिष्ठसमुदायत्वावच्छिन्नप्रयोज्योत्पत्तिकत्वस्य तत्तदनुव्यवसायादौ प्रसिद्धेः।

ननु तज्ज्ञानत्वावच्छिन्ने प्रामाण्यग्रहस्यैव प्रवर्तकत्वमिति पूर्वमेव निरूपितम्। तथाच तज्ज्ञानत्वावच्छिन्ने प्रामाण्यप्रकारकताया एव मीमांसकसिषाधयिषाविषयतया तन्निर्वाहाय तज्ज्ञानविषयत्वाप्रयोज्य तज्ज्ञानत्वावच्छिन्नस्वाश्रयविषयताकग्रहजनकत्वं ज्ञानग्राहकदलार्थतया स्वीकरणीयमितिचोक्तम्। तथा च यावत्त्वं व्यर्थम्। इदं ज्ञानं प्रमेत्यादि नैयायिकसिद्धानुमित्यादेः ज्ञानग्राहकदलेनैव वारणात्[७७] सिद्धसाधनानवकाशात्। अत एव तदप्रामाण्याग्राहकत्वदलं च व्यर्थमितिचेन्न। [७८]ज्ञानभेदेन प्रामाण्यभेदानङ्गीकारेण पूर्वं किञ्चिज्ज्ञाने संवादिप्रवृत्तिजनकत्वादिलिङ्गेन गृहीतस्य घटत्ववति घटत्वप्रकारकत्वा-देरव्यवहितपूर्वक्षणवृत्तिस्मरणविषयस्य तदाश्रयज्ञानव्यक्त्यन्तरा-नुव्यवसायादावुपनीतत्वस्य नैयायिकैरभ्युपगमेन तत्सार्थक्यात्।

अथ स्यात् - गुणत्वज्ञानत्वादिना ज्ञानान्तरविषयकपरामर्शजन्य घटज्ञानविधेयकानुमितेर्विशिष्टज्ञाने विशेषणज्ञानहेतुतानङ्गीकारिणां-

---

७७. सिद्धसाधनानवकाशात् इति - तज्ज्ञानविषयत्वाप्रयोज्यतज्ज्ञानत्वावच्छिन्न स्वाश्रयविषयताकग्रहजनकत्वं यदि ज्ञानग्राहकत्वम्, तदा यावत्त्वं व्यर्थम् नैयायिकोक्तप्रमात्वानुमित्यादेः या ज्ञानविषयता सा तज्ज्ञानविषयताप्रयोज्येति न सिद्धसाधनम्।

७८. ज्ञानभेदेन प्रामाण्यभेदानङ्गीकारेणेति अयंभावः संवादिप्रवृत्तिजनकत्व-लिङ्गकानुमित्या प्रमात्वं गृहीतं चेत् तत्रत्यविषयता परामर्शीयप्रामाण्यविषयता प्रयोज्येति न सिद्धसाधनप्रसक्तिरिति शङ्का पूर्वं कृता। इदानीं सिद्धसाधनप्रसक्ति मुपपादयति - तथाहि - ज्ञानभेदेन प्रामाण्यभेदानङ्गीकारोऽस्मदिष्टः।

मीमांसकानां सत्त्वात्तामादाय तेषां बाधइति चेन्न । तज्ज्ञानविषयित्वा-प्रयोज्यत्वेन नैयायिकसिद्धत्वस्य विवक्षणीयत्वात् नैयायिकानां व्यवसायाव्यवहितोत्तरक्षणोत्पन्नानुव्यवसाय एव ज्ञाततालिङ्गकानु-मितित्वेन भट्टैरुपगम्यतइति तदीयज्ञानविषयितापि तदप्रयोज्यत्वेन नैयायिकसिद्धा । सर्वमेव [७९]द्वितीयविप्रतिपत्त्यादौ स्फुटीभविष्यति । अत एवच घटज्ञानं गुणइत्यादिशाब्दसामग्रीव्युदास इति दिक् ।

ननु नायंघट इति बाधभ्रमाव्यवहितोत्तरक्षणोत्पन्नस्यायं घट इति व्यवसायस्यानुव्यवसायेन घटत्ववत्त्वादिघटितप्रामाण्याग्रहाद्बाधः। न च तदाव्यवसायस्यैवानुत्पादान्नानुव्यवसाय इति वाच्यम् । अतः लौकिक मानसादिबाधभ्रमानन्तरं लौकिकसन्निकर्षजन्यव्यवसायसम्भवेनानु-व्यवसायोत्पत्तेरिति चेन्न । तद्वतितत्प्रकारकत्वस्य तद्वत्तांशे निधर्मितावच्छेदककस्य ग्रहे बाधप्रतिबध्यत्वासत्त्वात् । विशेष्यांशे समानप्रकारकयोरेव भावाभावज्ञानयोः प्रतिबध्यप्रतिबन्धक-भावाभ्युपगमात् तत्रत्यानुव्यवसाये प्रामाण्याभानबाधकानुपलम्भात् । न च विशेष्यतात्वावच्छेदेन घटत्ववतोऽभावभ्रमानन्तरं घटत्ववत् विशेष्यिताघटितप्रामाण्यभानासम्भवात् अनुपपत्तिस्तदवस्थैवेतिवाच्यम् ।

७९. सर्वमेव द्वितीयविप्रतिपत्त्यादौ स्फुटीभविष्यति - इति प्र.वा-पृ.सं. ८१ 'अत्राहुः - तादृशज्ञानजन्यत्वेन यन्नैयायिकसिद्धम् तद्भिन्नत्वमजन्यान्तेन विवक्षितम्' इति दीधितिः। अथस्यादितिप्रकृतग्रन्थार्थः संक्षिप्यते- विशिष्टज्ञानं प्रति विशेषणज्ञानं न कारणम् इति मीमांसकाः। तन्मते घटज्ञानविधेयकानुमितिः गुणत्वज्ञानत्वादिना ज्ञानान्तरविषयकपरामर्शजन्या यत्र भवति, तत्र घटज्ञानस्य पूर्वं ज्ञानं नावश्यकं तन्मते, विशेषणज्ञानस्यानावश्यकत्वात् । एवं च विशिष्टज्ञानरूपानुमितीयघटज्ञानविषयता तज्ज्ञानप्रयोज्या इति तादृशानुमिति-सामग्रीगाह्यत्वं प्रामण्ये नास्तीति बाधशङ्का । तज्ज्ञानविषयित्वाप्रयोज्यत्वेन नैयायिकासिद्धत्वं विशेषणं चेत् अनुमितीय घटज्ञानविषयता न स्वीकर्तुं शक्यम् इति समाधानम् ।

घटत्ववद्धर्मितावच्छेदकतया विशेष्यितात्वस्य प्रामाण्यघटकत्वानङ्गीकारात् । घटत्ववतः विशेष्यितात्वस्य च एकत्रद्वयमितिरित्या विशेष्यिताविशेषणतया प्रामाण्यघटकत्वानङ्गीकारात् प्रामाण्यघटकप्रकारधर्मिकावृत्तित्त्वज्ञानं तु तद्धर्मिकवृत्तित्वज्ञानं प्रत्येव प्रतिबन्धकम्, न तु तद्वत्ताज्ञानं प्रत्यपि प्रतिबन्धकं असमानविशेष्यकत्वादित्येवाङ्गीकृत्योक्तपरिष्कारः क्रियत इति न दोष इति दिक् ।

न्यायकौस्तुभरीत्याविधिकोटिनिष्कर्षः तत्परिशीलनञ्च

यत्तु - [८०]न्यायकौस्तुभे प्रामाण्यप्रकारत्वनिरूपितालौकिकविषयताभिन्ना यास्वाश्रयज्ञानवृत्तिर्विषयता तन्निरूपकयावज्ज्ञानग्राह्यत्वमेव विधिकोटिः, तादृशी च विषयता प्रामाण्यप्रकारतानिरूपितविशेष्यतारूपा अलौकिकविषयताचेति तन्निरूपकत्वेन प्रमापदजन्यबोधः स्वप्रकाशानुव्यवसायादिश्च गृह्यते । एवञ्च ज्ञाततालिङ्गकानुमितेः अलौकिकविषयतानिरूपकत्वेन प्रामाण्यप्रकारतानिरूपितविषयताकत्वेन च उपसंग्रहः । प्रकृतप्रामाण्याश्रयघटादिमुख्यविशेष्यताघटितज्ञानेत्यत्र प्रामाण्यमेवो-

८०. ननु नायं घट इति - अयं भावः नायं घट इति बाधभ्रमः। तदनन्तरं अयं घट इति व्यवसायो जातः तदनुव्यावसायेन घटत्वघटितप्रामाण्यं न गृह्यते इति बाधः। न च बाधज्ञानसमनन्तरं व्यवसाय एव न जन्यत इति वाच्यम् अलौकिक मानसादि बाधभ्रमानन्तरं लौकिकसन्निकर्षजन्यस्य व्यवसायस्योत्पत्तौ बाधकाभावात्। अतः बाध इति पूर्वपक्षः। सिद्धान्तस्तु - मिश्रमते सोऽनुव्यवसायः प्रामाण्यं गृह्णात्येवेति न बाधः। अनुव्यवसायेन तद्वत्तांशे निर्धर्मितावच्छेदककस्य प्रामाण्यस्य ग्रहे दोषाभावात्। न च विशेष्यित्वत्वावच्छेदेन घटत्ववतः यत्राभावो भ्रान्तः, तत्र घटत्ववद्विशेष्यिताघटितप्रामाण्यमनुव्यवसाये भासेत इति वाच्यम्, घटत्ववतः धर्मितावच्छेदकतया विशेष्यितात्वस्य प्रामाण्यघटकत्वाङ्गीकारात् दोषाभावात्। अपि तु घटत्ववत्, विशष्यितात्वं च एकत्र द्वयमितिरीत्या विशेष्यितायां भासते। तद्वत्तांशे निर्धर्मितावच्छेदककेत्यस्यार्थः - घटत्ववतः धर्मितावच्छेदकं किमपि न भासत इत्यर्थः ।

पादेयम्। तेन घटज्ञानमिति शाब्दवृत्तिरनुव्यवसायस्य लौकिकविषयता मुख्यविशेष्यताघटित प्रामाण्यश्रयवृत्तिरेव न भवतीतिघटप्रामाण्यस्य तादृशानुव्यवसायाग्राह्यत्वेपि न क्षतिरिति परिष्कृतम्। तन्न स्वाश्रयनिष्ठलौकिकविषयतानिवेशेनैव समनन्तरोक्तरीत्या समन्वयसम्भवे गौरवात्। मुख्यविशेष्यताघटितप्रामाण्यविवक्षाप्यनुचिता [८१]गुरुमता-संग्रहप्रसङ्गात्। तन्मते घटमुख्यविशेष्यकज्ञानस्य शशशृङ्गतुल्यत्वात्। पूर्वोक्तरीत्या तस्यापि विवक्षितविरोधि-तालक्षणवत्त्वात्[८२]।

दीधित्युक्तस्य अत्रवदन्ति कल्पस्य विचारः

दीधितिकृतस्तु - इदं घटत्वप्रकारकं ज्ञानं सविशेष्यकमित्यादि शाब्दादिसामग्र्या अयं घटज्ञानवान् घटेच्छावत्त्वादित्याद्यनुमिति सामग्र्या प्रामाण्याग्रहात्बाधवारणाय ज्ञानप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद्भट्टमतसिद्धं तद्भिन्नार्थकं अग्राहकान्तं

---

८१. न्यायकौस्तुभ इति - अयंभावः - प्रामाण्यप्रकारतानिरूपिता लौकिक विषयताभिन्ना या स्वाश्रयज्ञानवृत्तिः विषयता तन्निरूपकयावज्ज्ञानग्राह्यत्वमेव विधिकोटिः तादृशी विषयता प्रामाण्यप्रकारतानिरूपितविशेष्यता, अलौकिकविषयता च एवं च प्रमापदजन्यबोधः, स्वप्रकाशः, अनुव्यवसायः, ज्ञाततालिङ्गकानुमितिश्च तादृशविषयतानिरूपकज्ञानत्वेन संगृह्यते। घटज्ञानं शाब्दयामीति अनुव्यवसायस्य घटज्ञानगतप्रामाण्याविषयकत्वेऽपि न क्षतिरिति च स्पष्टम्। तन्नेति-स्वीयज्ञाननिष्ठलौकिकविषयतानिरूपितविषयिता सम्बन्धावच्छिन्नवच्छेदकतावच्छेदकघटितप्रामाण्यस्यैव स्वविषयत्वमिति मिश्रसम्मतम्। स नियमोऽपि अत्रस्मार्यते।

८२. न च गुरुमतासंग्रहप्रसङ्गः कथम्? गुरुमते अयंपटः पटमहं जानामीति व्यवसायस्यैव स्वीकारात् तत्र पटमुख्यविशेष्यकत्वस्याबाधात् इति वाच्यम्, सामान्यतः पटमहं जानामीत्येव तन्मतेव्यवसायः, तत्र आत्मन एव मुख्यविशेष्यत्वमित्याशयेन तथाकथनात्।

निरुक्तशाब्दादिसाग्रच्या इच्छादिलिङ्गकानुमितिसामग्र्याश्च तज्ज्ञान-प्रामाण्याग्राहकतया ज्ञानग्राहकतया च भट्टाभ्युपगताद्व्यावृत्तिः। ज्ञानलौकिकमानसस्यानुव्यवसायस्यातिन्द्रियतावादिना भट्टेनानङ्गीकारान्मनः संयुक्तसमवायादिघटिततत्सामग्री न ग्राहकत्वेन तन्मतसिद्धा। चक्षुस्संयोगादिघटिताव्यवसायसामग्री च घटादिग्राहकत्वेन तन्मतसिद्धापि न ज्ञानग्राहकत्वेन तदुपगता, गुरुभिरेव तस्या ज्ञानग्राहकत्वोपगमात्। ज्ञाततालिङ्गकानुमितिसामग्री च ज्ञानग्राहकत्वेन तन्मतसिद्धापि न प्रामाण्याग्राहकत्वेन तन्मतसिद्धा, तन्मते तयैव प्रामाण्यग्रहाङ्गीकारात्। अतःतत्तन्मते प्रामाण्यग्राहकत्वेन अभिमतानां सामग्रीणां संग्रह इति प्राहुः।

यादृशज्ञानशाब्दादिजनकसामग्र्याः प्रामाण्यानुमितौ ज्ञायमान लिङ्गविधया जनकता तादृशसामग्रचा ज्ञानग्राहकत्वप्रामाण्याग्राहकत्वाभ्यां भट्टमतसिद्धभिन्नतया तज्जन्यज्ञानशाब्दादौ प्रामाण्याभानात् बाधापत्तेः प्रामाण्याग्राहकत्वेनेति न पृथङ्निवेश्यते। किन्तु ज्ञानग्राहकत्वघटकग्रहणे प्रामाण्याविषयकत्वं निवेश्यते। तथाचोक्तसामग्र्याः प्रामाण्यग्रहजनकत्वेपि तज्ज्ञानप्रामाण्याविषयकज्ञानशाब्दं प्रत्यपि जनकतया न प्रामाण्याविषयक ज्ञानग्रहजनकत्वप्रकारकभट्टाभ्युपगमविषयत्वासम्भव इति वाच्यम्। [८३]घटज्ञानवान् तत्सामग्र्या इत्यनुमानस्थले ज्ञायमानलिङ्गविधया व्यवसायादिसामग्र्यास्तज्ज्ञानप्रामाण्याविषयकज्ञानग्रहजनकत्वेन भट्टाभिमततया तदसंग्रहापत्तेः।

यदपि तज्ज्ञानप्रामाण्यग्रहोपधानप्रयोजकत्वानवच्छेदकतया ज्ञानग्रहोपधानप्रयोजकतावच्छेदकतया च भट्टमतसिद्धभिन्नं यत् तज्ज्ञानग्रहोपधानप्रयोजकतावच्छेदकं तदवच्छिन्नप्रयोज्योत्पत्तिक

---

८३. प्र.वा-पृ.सं.३३ & प्र.वा-पृ.सं.४४

यावद्ग्रहविषयत्वं साध्यमावश्यकम्, [८४]वारणीययत्किञ्चिज्ज्ञानशाब्द सामग्रीपर्याप्तसमुदायत्वस्य ज्ञायमानलिङ्गविधया प्रामाण्यानुमिति-जनकतावच्छेदकत्वेपि तदुपधानप्रयोजकतानवच्छेदकत्वात् ज्ञानग्रहो-पधानप्रयोजकतावच्छेदकत्वाच्च। तज्जन्यज्ञानग्रहस्य साध्याघटकत्वात् न बाधः। व्यवसायादिसामग्र्याज्ञायमानलिङ्गविधया घटज्ञानग्रहजनकत्वेपि तत्सामग्रीपर्याप्तसमुदायत्वस्यज्ञानग्रहोपधान प्रयोजकतानवच्छेदकतया न तदसंग्रहः नैयायिकमतसिद्धत्वोक्तावनुव्यवसायसामग्र्यसंग्रहः। [८५]गुरुमता-सिद्धत्वं मिश्रमतासिद्धत्वं वा यदि निवेश्यते तदा व्यवसायसामग्र्याः गुरुमतेऽनुव्यवसायसामग्र्याः मिश्रमते च विशिष्टभेदसत्त्वेप्युपनीतघट-ज्ञानादिविषयकस्य ज्ञानजन्यज्ञाततावान् घट इत्यस्य प्रत्यक्षस्य सामग्र्या गुरुमिश्रमतासिद्धतया घटज्ञानादिप्रामाण्याग्रहात् भट्टमते बाधःस्यादिति भट्टमतोपादानमिति गदाधरभट्टाचार्यैः परिष्कृतम्।

---

८४. घटज्ञानवानिति - घटज्ञानवान् तत्सामग्र्या इत्यनुमानस्थले व्यवसायसामग्र्याः हेतुभूतायाः ज्ञायमानलिङ्गविधया घटज्ञानानुमितिहेतुत्वात् तज्ज्ञान प्रामाण्याविषयकज्ञानग्रहजनकत्वेन भट्टाभिमता सा सामग्रीति तस्याः संग्रहो नस्यादिति पूर्वपक्षः।

८५. प्र.वा-पृ.सं. - ५१ - 'प्रामाण्यग्रहफलोपधानप्रयोजकतानवच्छेदकतया ज्ञानग्राहकतावच्छेदकतया च भट्टाभ्युपगतम् यादृशं रूपम्' इत्यादि भट्टाचार्य ग्रन्थः। प्रामाण्यग्रहफलोपधायकतानवच्छेदकतया ज्ञानग्रहफलोपधायकता-वच्छेदकतया च भट्टाभ्युपगतं यादृशं समुदायत्वं तादृशसमुदायत्वभिन्नं ज्ञानग्रह फलोपधायकतावच्छेदकीभूतं यत् समुदायत्वम् तदवच्छिन्नसामग्रीजन्य यावद्ग्रहविषयत्वं मीमांसकमते साध्यं पर्यवसितम्। एवं च व्यवसायादि सामग्रीजन्य घटज्ञानग्रहस्य प्रामाण्याविषयकत्वेन प्रसक्तः बाधोनास्ति। तादृश घटज्ञानग्रहस्य साध्याघटकत्वात्। प्र.वा-पृ.सं. -५२ गादाधर्यामयं विषयः स्पष्टः।

तन्न। [८६]उपनीतघटज्ञानविषयकपटज्ञानानुव्यवसायेन घटज्ञान-प्रामाण्याग्रहात् मिश्रमते बाधप्रसङ्गात्। तादृशपटज्ञानानुव्यवसायसामग्री-पर्याप्तधर्मस्यापि ज्ञानग्रहोपधायकतावच्छेदकत्वप्रकारकभट्टाभ्युपगम-विषयत्वाभावात्। न च तत्र घटज्ञानपटज्ञानयोर्भासकं सामग्रीद्वयमेव तत्संवलनादुभयविषयकमेकज्ञानम्, एवं च तत्र घटज्ञानग्राहिकासामग्री तज्ज्ञानादिरूपा भट्टेनान्वयबोधसामग्रीत्वेनोपेयत इति वाच्यम्। [८७]समूहालम्बनस्थले सामग्रीभेदेपि यत्रोपनीतघटज्ञानसमानाधिकरण

---

८६. प्र.वा-पृ.सं.-५३- नैयायिकमतासिद्धत्वोक्तौ - इति - प्रामाण्याग्राहकत्वेनज्ञानग्राहकत्वेन नैयायिकमतसिद्धभिन्ना या ज्ञानग्राहिका सामग्री तज्जन्यग्रहविषयत्वम् इत्युक्तौ इत्यर्थः। अनुव्यवसायसामग्र्यसंग्रहः इति अनुव्यवसायस्य न्यायमते प्रमात्वाविषयकतया तज्जनकसामग्र्याः प्रामाण्याग्राहकत्वेन न्यायमतसिद्धत्वात् इति। व्यवसायसामग्र्यसंग्रहस्तु नास्ति तादृशसामग्र्याः न्यायमते ज्ञानग्राहकत्वविरहेण प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन न्यायमतसिद्धभिन्नत्वादिति। एवं ज्ञाततालिङ्गकानुमितिसामग्री अपि ग्रहीतुं शक्यते।

४. उपनीतेति - भट्टमतासिद्धत्वोक्तावपि मिश्रमतासंग्रह एव। उपनीतघटज्ञानविषयकः पटज्ञानानुव्यवसायः, तत्सामग्र्याः ज्ञानग्राहकत्वेन भट्टमतसिद्धत्वाभावात् तज्ज्ञानग्राह्यत्वस्य प्रामाण्येऽभावात् बाधः।

८७. प्र.वा-पृ.सं. ५४ - घटज्ञानवान् पटज्ञानवान् अहम् इत्यनुव्यवसाये, सामग्रीद्वयं घटज्ञानभासको ज्ञानलक्षणासन्निकर्षः पटज्ञानभासिका अनुव्यवसायसामग्री आत्ममनः सन्निकर्षः। एकज्ञानम् इति - घटज्ञान - पटज्ञानोभयविषयकं एकं ज्ञानम् इत्यर्थः अन्वयबोधसामग्रीत्वेनेति - तथा च घटज्ञानग्राहक सामग्र्या भट्टमतसिद्धत्वादेव भट्टमतसिद्धभिन्नत्वविरहेण तस्याः साध्याघटकत्वात् न तामादाय बाध इति। उपनीतघटज्ञानसमानाधिकरणपटज्ञानत्वादिनेति - उपनीतं यद् घटज्ञानं तत्समानाधिकरणं यत्पटज्ञानं तत्वेनेत्यर्थः। घटज्ञानसमानाधिकरणपटज्ञानवानहम् - पटज्ञानवान् इत्यनुव्यवसायाकारः। तत्र अनुव्यवसायजनकीभूतघटज्ञानपटज्ञानादिघटिता एकैव सामग्री न सामग्रीभेदः

पटज्ञानत्वादिना उपनीतघटज्ञानविशिष्टे आत्मनि पटज्ञानत्वादिना पटज्ञानानुव्यवसायस्तत्र तादृशविशिष्टविषयकानुव्यवसायस्य सामग्र्या विशिष्टघटकतया घटज्ञानग्राहिकया घटज्ञानप्रामाण्याग्राहकत्वात् बाधतादवस्थ्यात् ।

यत्तु - घटत्ववतीत्यादिप्रामाण्यमपि घटज्ञानं शाब्दयामीत्यनुव्यवसाये भासते तद्विषयभूते घटज्ञानमित्यादिव्यवसायेपि तत्प्रामाण्यसत्त्वादिति [८८]तत्तुच्छम् । स्वीयज्ञाननिष्ठलौकिकविषयतानिरूपितविषयितासम्बन्धावच्छिन्नावच्छेदकतावच्छेदकघटितप्रामाण्यस्यैव ज्ञानलौकिकप्रत्यक्षविषयतेति मिश्रसिद्धान्तात् । [८९]यदपि ज्ञानान्तरविशेष्यतानापन्नतन्निष्ठविशेष्यतानिरूपितस्वाश्रयनिष्ठप्रकारताशालिग्रहसामग्री ज्ञानग्राहकसामग्रीपदेन विवक्षणीया । तेन निरुक्तघटज्ञानोपनीतभानेषु घटज्ञाने तादृशात्मनिष्ठविशेष्यतानिरूपितप्रकारताविरहेण तत्सामग्र्यास्साध्याघटकत्वात् न बाधः । न च आत्मनः लौकिकप्रत्यक्षे पटज्ञानस्य इच्छादेः वा विशेषगुणस्य विद्यमानस्य भानावश्यकतया

इत्यर्थः । विशिष्टघटकतया विशिष्टरूपैकसामग्रीनिविष्टतया घटज्ञानग्राहिकायाः इत्यर्थः ।

८८. बाधवारणं खण्डयति तत्तुच्छमित्यादिना - स्वीयज्ञाननिष्ठलौकिकविषयतापदेन घटज्ञानं शाब्दयामीत्यनुव्यवसायीयघटज्ञाननिष्ठाविषयता न स्वीकर्तुं शक्यते ।

८९. यदपीति - प्र.वा-पृ.सं. ५४ साध्याघटकतया - साध्यघटकसामग्रीपदेन ग्रहीतुमशक्यतया न बाध इति - उपनीतघटज्ञानविषयकपटज्ञानानुव्यवसायसामग्र्या पटज्ञानांशे प्रमात्वबोधनेऽपि घटज्ञानांशे यत्प्रामाण्यं तस्याग्रहेण यो बाधः स नेत्यर्थः । धर्मितावच्छेदकतयेति - पटादिज्ञानीयलौकिकभानांशे धर्मितावच्छेदकत्वावच्छिन्ना या तादृशानुव्यवसायीय घटज्ञाननिष्ठा प्रकारता तस्याः ज्ञानान्तरविशेष्यतानापन्नात्मनिष्ठविशेष्यतानिरूपितत्वाभावेन घटज्ञानवान् अहं पटं पश्यामीति अनुव्यवसायसामग्र्याः तथाविधसाध्यानन्तर्गततया बाधाभावः ।

लौकिकप्रत्यक्षविषयात्मांशे अविद्यमान घटज्ञानोपनीतभाने या पटज्ञानीयलौकिकभानांशे धर्मितावच्छेदकतया घटज्ञानप्रकारता तस्याः निरुक्तात्मविशेष्यतानिरूपितत्वविरहेऽपि, एवमुपनीतघटज्ञानावच्छिन्ने आत्मनि यत् इच्छायाः लौकिकप्रत्यक्षं तत्सामग्र्या भट्टमतसिद्धत्वेपि घटज्ञानवदात्मत्वेन परात्मोपनीतभानरूपे पटज्ञानानुव्यवसाये तादृशपरात्मनिष्ठविशेष्यतानिरूपितघटज्ञानप्रकारता सत्त्वात् तादृशानुव्यवसायेन घटज्ञानप्रामाण्याग्रहान्मिश्रमते बाधो दुर्वार एवेति वाच्यम् । [१०]तत्र परात्मनः उपनीतस्य मुख्यविशेष्यत्वे तज्ज्ञानस्य समूहालम्बनतया सामग्रीभेदेन तत्र घटज्ञानभासक सामग्र्या अन्वयबोधसामग्रीत्वेन भट्टमतसिद्धतया घटज्ञानप्रामाण्यस्य तदग्राह्यत्वेपि बाधानवकाशात् । तादृशात्मनः स्वात्माद्यंशे कथंञ्चित्प्रकारत्वे तु आत्मनो मुख्यविशेष्यतां निवेश्य बाधो वारणीय इति गदाधरभट्टाचार्यैः कथितम् ।

---

१०. तत्र परात्मन उपनीतस्येति- उपनीतं विशेषणतयैव भासत इति नियमो न मानसे, मानसे नायं नियम इति मथुरानाथैरुक्तत्वात् । अतः परात्मा उपनीतः मुख्यविशेष्यतया भासत एव। परात्मनः अनुव्यवसाये मुख्यविशेष्यतया भानम्, उत स्वात्माद्यंशे प्रकारतया भानम् इति विकल्पः। प्रथमकल्पे न बाधः तथा च घटज्ञानवान् अहं पटं पश्यामीत्यनुव्यवसाये उपनीतस्य परात्मनः मुख्यविशेष्यतयाभाने घटज्ञाननिष्ठप्रकारतानिरूपितविशेष्यता परात्मनि, पटज्ञाननिष्ठप्रकारतानिरूपिता सा स्वात्मनि इति अनेकविशेष्यकमिदं समूहालम्बनम् तत्र विशेषणविशेष्यभासकविभिन्नसामग्रीजन्यतया घटज्ञान भासकसामग्र्याः तदन्तर्गततया भट्टाभ्युपगमात् तस्य च ज्ञानस्य अन्वयबोधरूपतया भट्टेनानुमतत्वे तथाविधसामग्र्याः साध्यान्तर्गतत्वात् न बाध इति भावः। द्वितीयकल्पेऽपि दोषाभावं प्रदर्शयति - तादृशात्मन इति। स्वात्मनि नित्ये परात्मनः कालिकेन सम्योगेन वा प्रकारत्वासंभवादुक्तम् कथञ्चिदिति ।

शब्दानुपस्थितस्य ओदनसाधनत्वादेः शाब्दबोधविषयत्वविचारः

तदपि न साधीयः तथासत्युत्तरदीधितग्रन्थासङ्गतिप्रसङ्गात्। तथाहि- ओदनकामः पचेदित्यत्र ओदनकामकर्तव्यताबोधविषयः पाक इत्यादिशाब्दबोधे पाके ओदनसाधनताज्ञानविषयत्वमपि शब्दानुपस्थितमेव, घटेन जलमाहरेत्यादौ घटे छिद्रेतरत्वमिव विषय इति गुरुभिरङ्गीक्रियते। तत्र तत्सामग्र्याः शब्दाजन्यौदनसाधनता-ज्ञानज्ञानघटितायाः शब्दानुपस्थितस्य शाब्दगोचरतामनङ्गीकुर्वता भट्टेनानभ्युपगततया ओदनसाधनत्ववति तत्प्रकारकत्वरूपप्रामाण्याग्रहात् तत्प्रामाण्यस्य पक्षतायां गुरुमते बाध इत्याशङ्क्य शब्दानुपस्थिताया योग्यतायाः पूर्वं ज्ञानमात्रमुपेयते; न तु शाब्दबुद्धावनुप्रवेशः। अन्यथा उपस्थिताबाधितयावत्पदार्थानां भानापत्तेरतिप्रसङ्गादिति ह्युत्तरत्र [९१]दीधितकृता परिहरिष्यते ज्ञानान्तरविशेष्यतानापन्नात्मनिष्ठमुख्य-विशेष्यतानिरूपितस्वाश्रयनिष्ठप्रकारताकग्रहजनकत्वरूपस्य ज्ञानग्राहकत्वस्य साध्यघटकत्वे[९२] अत्रौदनसाधनताज्ञानस्य तादृशप्रकारताविरहादेव वारणे उक्तशङ्कापरिहारयोरनुत्थितिः।

[९३]यत्तु - उक्तशाब्दबुद्ध्या ओदनसाधनतात्वेन साधनताभाने ओदनसाधनेतरावृत्तित्वघटितस्य साधनतात्वस्य भानेन साधनत्वेन

---

९१. प्र.वा-पृ.सं.५९ दीधितिः - यदि ओदनसाधनत्वं शाब्दबुद्धौ न विषयइति स्वीक्रियते। तदा शब्दादनुपस्थितमपि शाब्दबुद्धौ भासत इति तन्मतविरोधइति न शङ्क्यम्, घटेन जलमाहरेत्यादौ शब्दानुपस्थितस्यापि छिद्रेतरत्वस्य शाब्दे भानस्य स्वीकारात्। तदुक्तं दीधितौ क्वचिच्छिद्रेतरत्वादेरपि भानम्, एकविशेषवाधे शाब्दबोधसामान्यसामग्र्या विशेषान्तर प्रकारकबोधजननस्वाभाव्यादिति' इति।

९२. ओदनसाधनताज्ञानस्येति ज्ञानान्तरविशेष्यतानापन्नात्मनिष्ठमुख्यविशेष्यता निरूपितप्रकारता ओदनसाधनताज्ञाने नास्तीत्यर्थः।

९३. प्र.वा-पृ.सं.५९

साधनभानात्तत्र शाब्दे साधनत्ववति साधनत्वप्रकारकत्वमस्तीति तदपि तेन गृह्यत एव। गुरुमते स्ववृत्तियावत्प्रामाण्यानां स्वेन भानाभ्युपगमात्। तथा च कथं बाध उक्त इत्याशङ्क्य साधनतात्वस्याखण्डोपाधिरूपतायाः कार्यभेदभिन्नानां साधनतानां अनुगमाय अवश्यमुपगन्तव्यतया तज्ज्ञाने साधनभाननियमात्, साधनत्ववन्निष्ठमुख्यविशेष्यताघटितस्यप्रामाण्यस्य तादृशशाब्दावृत्तेस्तादृशशाब्दविषयवृत्तेस्तेन ग्रहीतुमशक्यतया पूर्वोक्तरूप साधनतात्वभानेपि बाधस्यप्रसक्तिरिति परिहृतम् गदाधरभट्टाचार्यैः। तन्न। गुरुमते सर्वज्ञानेष्वात्मन एव मुख्यविशेष्यतया साधनत्ववन्निष्ठमुख्यविशेष्यताकत्वावच्छिन्नसाधनत्वप्रकारकत्वस्य शशविषाणकल्पत्वात्। गुरुमते स्ववृत्तिप्रामाण्यमात्रं स्वेन गृह्यत इत्यप्ययुक्तम्। प्रामाण्यप्रामाण्यादिकमादायानवस्थाप्रसङ्गेन [९४]तैरप्यात्मविशेषणतापन्नज्ञानविशेषणविषयवृत्तिधर्मघटितप्रामाण्यस्यैव स्वग्राह्यतयाभ्युपगन्तव्यत्वात्। तस्मादुक्तरीत्यामुत्तरदीधितिग्रन्थासङ्गत्या निरुक्तविवक्षणासम्भवादुक्तबाधस्तदवस्थः। एतेन तज्ज्ञानप्रामाण्याविषयकज्ञानग्रहोपधान प्रयोजकतावच्छेदकत्वेन भाट्टमतसिद्धभिन्नत्वं स्वाश्रयग्रहोत्पत्ति प्रयोजकतावच्छेदकविशेषणमित्यपि प्रत्युक्तम्[९५]।

---

९४. तैरपि - इति - अतः घटत्वघटितप्रामाण्यमेव स्वप्रकाशसामग्रीग्राह्यम्, न तु तत्र वर्तमानमपि ज्ञानत्ववतिज्ञानत्वप्रकारकत्वमपि - इति पूर्वमेवोक्तम्। अतः साधनत्ववति साधनत्वप्रकारकत्वं न तन्मते स्वतोग्राह्यम् इति।

९५. तज्ज्ञानांशे ग्राह्यत्वस्येति (प्र.वा-पृ.सं-७५) - गदाधरीयस्थोऽयं ग्रन्थसन्दर्भः- 'यद्यपि तज्ज्ञानांशे ग्राह्यत्वपर्यन्तस्य विवक्षणीयतया तज्ज्ञानावृत्तिपदार्थे एव निषेधप्रसिद्धिः सम्भवति, ईश्वरज्ञानस्य तज्ज्ञानांशे तदवृत्तिप्रकारकत्वे भ्रमत्वापत्तेः, तथापि तादृशज्ञानप्रकारकत्वमात्रं साध्यमिति विवक्षान्तरानुसरणेन अप्रसिद्धिरभिहिता, तज्ज्ञानांशे ग्राह्यत्वस्य साध्यत्वे निषेधसाधने बाधो बोध्यः' इति। अत्र तज्ज्ञानांशे ग्राह्यत्वस्य विवक्षणीयत्वं तु 'तादृशज्ञानग्राह्यत्वं तु तस्मिन् ज्ञाने तादृशज्ञानग्राह्यत्व' मिति दीधितिग्रन्थे उत्तरत्र (प्र.वा-पृ.सं.८३)।

द्वितीयविप्रतिपत्तिविचारः

तज्ज्ञानांशेग्राह्यत्वस्य स्वयमेव विवक्षणीयतज्ज्ञानसमानाधिकरणत्वेन चरमज्ञाने विशेषितेऽपि ईश्वरज्ञानस्य तस्मिंस्तदवृत्तिप्रकारकत्वे भ्रमत्वप्रसङ्गेन तज्ज्ञानांशे तज्ज्ञानावृत्तिधर्मग्राहकत्वाभावेन तज्ज्ञानावृत्तिप्रकारकत्वे भ्रमत्वप्रसङ्गेन तज्ज्ञानांशे तज्ज्ञानावृत्तिधर्मग्राहकत्वाभावेन तज्ज्ञानावृत्तिपदार्थे निषेधकोटेः प्रसिद्धतया नैयायिकमते बाधप्रसङ्गेप्यप्रसिद्ध्यसम्भवात् । उभयत्र तज्ज्ञानसामानाधिकरणत्वनिवेशेपि तज्ज्ञानविषयक तज्ज्ञानसमानाधिकरण ज्ञानस्य कालोपाधिविधयानुव्यवसायादिजनकत्वादसम्भव वारणाय तज्ज्ञानविषयकज्ञानाजन्यत्वघटकजनकतायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनीयतया तत एव विषयतासम्बन्धघटितपरमेश्वरज्ञाननिष्ठजनकताव्यावृत्तेः द्वितीयज्ञाने तज्ज्ञानसमानाधिकरणत्व निवेशनस्य निष्फलत्वाच्च ।

यत्तु इत्यादिना भट्टाचार्यमतानुवादः, तत्परिशीलनञ्च

यत्तु - तज्ज्ञानविषयकज्ञानजन्यत्वघटकजन्यताकालिक विशेषणतानवच्छिन्ना विवक्षिता। तेन कालोपाधिविधया तज्ज्ञानविषयकतज्ज्ञानजन्यतामादाय नासम्भव इति भट्टचार्याणाम् आशय इति । तन्न । विषयताघटिततज्ज्ञानसामानाधिकरण्यस्य भगवज्ज्ञानेपि सम्भवेन समवाय घटितसामानाधिकरण्यस्य तज्ज्ञानसमावायिनिरूपित समवायसम्बन्धा-

वच्छिन्नाधेयतारूपस्य गुरुतरस्य विवक्षणीयतया लघुतमस्य तद्घटित-समवायावच्छिन्नत्वमात्रस्य निवेशेनैव सर्वनिर्वाहे जन्यतायां कालिकविशेषणत्वानवच्छिन्नत्वमधिकं निवेश्य गुरुतरसामानाधिकरण्य-निवेशनस्य लाघवैकपक्षपातिनां भट्टाचार्याणामहृदयङ्गमत्वात्[१६]।

यत्तु - तज्ज्ञानविषयकज्ञानाजन्यज्ञानप्रकारत्वं साध्यमिति द्वितीयकल्पाभिप्रायेण निषेधकोट्यप्रसिद्धिकथनं तज्ज्ञानांशे ग्राह्यत्वविवक्षापक्षे तु बाध एव वक्तव्य इति गदाधरभट्टाचार्यैरुक्तम्। तत्र विचारणीयम्। [१७]प्रकारिता ज्ञानाद् यदि नातिरिच्यत इति मतं, तदा घटत्ववतिघटत्वप्रकारकत्वत्वेन पक्षतायां निरुक्तज्ञानग्राह्यत्वस्य साध्यत्वे तज्ज्ञानव्यक्तिभिन्नज्ञानप्रकारकप्रामाण्यानुमितिमादाय तथाविधग्राह्यत्वस्य ज्ञानान्तरीयप्रामाण्ये सिद्धतया अंशतस्सिद्धसाधनं पक्षतावच्छेदकैक्ये-

---

१६. यत्तुतज्ज्ञानविषयकेति - प्र.वा-पृ.सं.७६

१७. यदिप्रकारिता ज्ञानानतिरिक्तेति - अयम्भावः - प्रामाण्यस्य तत्तज्ज्ञाननिष्ठप्रकारिताविशेषरूपस्य तत्तज्ज्ञानव्यक्तिस्वरूपतामते प्रामाण्याश्रयतत्तज्ज्ञानं तत्तद्व्यक्तित्वेनैव उपादेयम्। प्रमात्वसामान्य लक्षणाजन्यज्ञानमादाय सिद्धसाधनानवकाशादित्यभिप्रत्येण तस्मिन् ज्ञाने इति दीधितिकृद्भिरुक्तम्। तदंशमनुपादाय तादृशज्ञानप्रकारतामात्रनिवेशे हि घटत्वति घटत्वप्रकारकत्वत्वादिना पक्षतायां तज्ज्ञानव्यक्तिभिन्नघटत्वादिप्रकारक-ज्ञाननिष्ठतादृशज्ञानप्रामाण्ये तज्ज्ञानविषयकज्ञानाजन्यज्ञानान्तरपक्षकानुमित्या-दिग्राह्यतया सिद्धसाधनं प्रसजति, प्राचीनैः पक्षतावच्छेदकैक्येऽपि अंशतः सिद्धसाधनस्य दोषत्वाङ्गीकारात्। तस्यादोषत्वेऽपि अंशतो बाधेन नैयायिकानामुद्देश्यायाः घटत्ववति घटत्वप्रकारकत्वत्वावच्छेदेन स्वतस्त्वाभावसिद्धिः न निर्वहति।

यदि च प्रकारिता ज्ञानस्वरूपातिरिक्ता, तदा प्रमात्वसामान्यलक्षणाजन्य-तद्विशिष्टापूर्वव्यक्तिप्रत्यक्षग्राह्यतया सिद्धसाधनवारणाय तज्ज्ञानपदस्य प्रमात्वाश्रयपरत्वेनोक्तदोषावकाशः इत्याशयः।

प्यंशतःसिद्धसाधनस्य प्राचीनमते दोषताङ्गीकारात् तददोषत्वेप्यंशतोबाधेन नैयायिकानाम् उद्देश्यासिद्धिः। घटत्ववति घटत्वप्रकारकत्वत्वावच्छेदेन स्वतस्त्वाभावसिद्धेरनिर्वाहात्। ततः तज्ज्ञाननिष्ठविशेष्यतानिरूपित-प्रकारतापर्यन्तं साध्यं विवक्षितम्। यदा पुनः प्रकारिता ज्ञानस्वरूपादति-रिच्यते तदा घटप्रमासु सर्वासु घटत्ववति घटत्वप्रकारकत्वस्यैकत्वात् तदात्मकप्रमात्वसामान्यलक्षणजन्यप्रमात्वविशेषणविशिष्टापूर्वज्ञान-मानसमादाय सिद्धसाधनं दुर्वारम्। अतः तज्ज्ञानपदं प्रकृतप्रमात्वाश्रयपरं, प्रमात्वघटकघटत्वप्रकारकत्वाद्याश्रयपरं वा। तथा च सामान्यलक्षण-जन्यमानसव्युदासः। अत एव तज्ज्ञाननिष्ठ विशेष्यतानिरूपितत्वांशो न निवेशनीयः, ज्ञानान्तरपक्षक प्रामाण्यानुमित्यादिप्रकारताया अनुमितौ प्रकृतप्रामाण्याश्रयविषयकज्ञानज्ञानजन्यतासत्त्वेनैव व्युदासात्। इदानीं तज्ज्ञानपदस्य प्रकृतप्रामाण्याद्याश्रय परतया तन्निवेशे परतः प्रमात्वमात्रं साध्यम् इति कल्पद्वयं भवद्भिरेव विभज्य परिष्कृतम्। तथा च द्वितीयकल्पे तज्ज्ञानपदस्य प्रकृतप्रामाण्याश्रयादि-परतया परमेश्वरज्ञानस्य तथाविध स्वसमानाधिकरणत्वात् कथं व्यावृत्तिः। [१८]उक्तं च भवद्भिरेव। यदा तज्ज्ञानपदं प्रकृतप्रामाण्याश्रयपरं तद्घटकाश्रयपरं वा तदा उत्तरज्ञाने चैत्रादिनिष्ठत्वेनविशेषणीये, न तु तज्ज्ञानसमानाधिकरणत्वेन, ईश्वरज्ञानस्यापि प्रामाण्यश्रयतया तस्यापि स्वात्मकतत्समानाधिकरणतया व्यावृत्त्यनुपपत्तिरिति । तथा च प्रकारतामात्रसाध्यत्वकल्पे तज्ज्ञानसमानाधिकरणत्वस्यापि विशेषणत्वात् तत्पक्षावलम्बनेन निषेधाप्रसिद्धिकथनं न संगच्छते।

एतेन ग्राह्यपदेन तज्ज्ञानांशे ग्राह्यत्वं विवक्षणीयम् अन्यथा ज्ञान-व्यक्तिभेदेन प्रामाण्यभेदानुपगमे घटत्वादिप्रकारकैतज्ज्ञानविषयक

१८. उक्तं च भवद्भिरेवेति - प्र.वा. पृं.सं. ७९

ज्ञानाजन्यतादृशज्ञानान्तरपक्षकप्रामाण्यानुमितिविषयतया सिद्धसाधनानुपपत्तेः इति ग्रन्थोपि परास्तः । प्रमात्वसामान्यलक्षणजन्यज्ञानमादायोक्तक्रमेणदोषादिति दिक् ।

ननु प्रमात्वज्ञानवद्भिन्नप्रागभावप्रतियोगित्वस्य तज्ज्ञानविषयकज्ञानवद्भिन्नप्रागभावप्रतियोगित्वरूपस्य अजन्यांतार्थत्वे ईश्वरज्ञानवारणेपि गुरुमते ज्ञानप्रागभावस्य तद्ध्वंस्य च आत्मस्वरूपतया आत्मनः कालिकविशेषणत्वानुयोगित्वप्रतियोगित्वयोरभावात् गुरुमतासंग्रहः । न चेदानीं तज्ज्ञानं ध्वस्तम् एतज्ज्ञानं भविष्यतीत्यादिप्रतीति व्यवहाराभ्यां ध्वंसत्वप्रागभावत्वादिविशिष्टरूपेण कालिकविशेषणता प्रतियोगित्वानुयोगित्वयोः स्वीकारान्न दोष इति वाच्यम् । तथा सति प्रामाण्यानुमितिप्रागभावस्याप्यात्मस्वरूपस्यानुमितिध्वंसत्व विशिष्टत्ववेषेण प्रमात्वज्ञानाद्यात्मकपरामर्शध्वंसाधिकरणतया कालिकविशेषणतासंबन्धावच्छिन्नतद्ध्वंसत्वावच्छिन्न प्रतियोगितावच्छेदकताकभेदवत्त्वस्य असंभवेन सिद्धसाधनप्रसङ्गादिति चेन्न स्वीयकालिकविशेषणतानुयोगिताच्छेदकत्व, ध्वंसत्वावच्छिन्न कालिकविशेषणतानुयोगितावच्छेदकत्वोभयसंबन्धावच्छिन्न प्रमात्वज्ञानादिनिष्ठप्रतियोगितावच्छेदताकभेदवतः प्रागभावस्य निरूपकं यज्ज्ञानं तत्प्रकारकत्वस्य विवक्षणीयत्वात्, प्रामाण्यानुमितिध्वंसत्वादेरेव प्रमात्वज्ञानादिध्वंसत्वावच्छिन्नप्रतियोगिककालिंकविशेषणतानुयोगितावच्छेदकतया तदनुमितिप्रागभावत्वादेरतथात्वात्, प्रागभावत्वस्य चाखण्डोपाधित्वान्न-प्राक्पदवैयर्थ्यं इति न ध्वंस प्रतियोगित्वविशिष्टमभावत्वं प्रागभावत्वं सामयिकात्यन्ताभावानङ्गीकारादुपगम्यते । तथा ध्वंसप्रतियोगित्वार्थकं प्राक्पदमनुपादेयम् ।

तदेत्सर्वमभिसंधाय परिष्करोति ।

स्वज्ञानवतोन्यस्य प्रतियोगिप्रागभावस्य ।
यज्ज्ञानं तद्विषयो न वा स्वकालापरत्वाभ्याम् ।। ९ ।।

नवमश्लोकार्थविवरणम्

तत्प्रामाण्यमिति व्यवहितपूर्वश्लोके प्रकृतं, तदिह प्रथमस्वशब्देन परामृश्यते । तथाच स्वज्ञानं प्रमात्वज्ञानं पर्यवसितम् । स्वकालापरत्वाभ्याम् । कालः कालिकविशेषणता । परत्वम् उत्तरत्वम् । अपरत्वम् अनुत्तरत्वं ध्वंसानधिकरणत्वरूपम् । तथा च स्वप्रतियोगिककालिक-विशेषणत्वानुत्तरत्वोभयसम्बन्धेन प्रमात्वज्ञानवतोऽन्यस्य प्रागभावस्य प्रतियोगि यज्ज्ञानं तद्विषयो नवा इति द्वितीयविप्रतिपत्तिपरिष्कार इत्यर्थः । यद्वा - प्रथमस्वशब्दः स्वकीयपरः ज्ञानस्य - प्रकृतप्रामाण्यसम्बन्धिनो ज्ञानस्य यज्ज्ञानम् - तज्ज्ञानविषयकज्ञानमिति यावत् । निरुक्तोभयसम्बन्धेन तद्वतोन्यस्य प्रागभावस्य प्रतियोगीत्यादि पूर्ववत् । व्याख्यानद्वयेपि द्वितीयस्वपदं श्लोके स्वज्ञानपदप्रतिपाद्यपरम् ।

द्वितीयपक्षे अर्थान्तरदोषाविष्कारः तत्समाधानञ्च

ननु तज्ज्ञानविषयकज्ञानपदस्य प्रागभावप्रतियोगिज्ञानप्रकारत्वमिति द्वितीयपक्षे घटत्ववति घटत्वप्रकारकत्वेन व्यक्त्यन्तरनिष्ठव्यापकताघटित संवादिघटप्रवृत्यादिनिष्ठव्याप्त्यवगाहिपरामर्शजन्यत्ववत् परामर्शगृहीत व्यक्त्यन्तरविषयकानुमितिमादाय अर्थान्तरप्रसङ्गः मीमांसकैर्विशेषण-ज्ञानस्य विशिष्टज्ञानहेतुतानङ्गीकारेणापूर्वव्यक्तिविधेयकानुमितेस्तन्मते सम्भवात्, तद्ग्राह्यतयैव विधिसिद्धेश्चरितार्थतया उद्देश्यप्रत्यक्षमादाय साध्यपर्यवसानासम्भवात् । न च घटत्ववति घटत्वप्रकारकत्वस्य सामान्यलक्षणाजन्यज्ञानमादाय सिद्धसाधनवारणाय अस्मिन् पक्षे तज्ज्ञानपदस्य घटत्वप्रकारकत्वाश्रयपरत्वस्य स्वीकरणीयतया उक्तस्थले परामर्शस्य घटत्वप्रकारकत्वाश्रयविषयकतया नानुमितेः तज्ज्ञानवदन्य

प्रागभावप्रतियोगित्वमिति वाच्यम्। तथापि घटत्ववति घटत्वप्रकारकत्वेन पटमात्रविषयकज्ञानावगाहिपरामर्शजन्यानुमितिमादाय अर्थान्तर-प्रसङ्गस्यापरिहरणात् । सर्वज्ञानयाथार्थ्यवादिगुरुमते तदसम्भवेपि भट्टमिश्रयोर्मते तत्सम्भवात् । एवं ज्ञानत्वेन पटज्ञानविषयक परामर्शात् घटत्ववतिघटत्वप्रकारकत्वे लाघवमिति लाघवज्ञानसहकृताद् घटत्ववतिघटत्वप्रकारकत्वेन पटज्ञानानुमितेः उत्पत्त्या तामादायाप्यर्थान्तरप्रसङ्ग इति चेन्न । भ्रमाजन्यप्रमाप्रकारकत्वस्य विवक्षितत्वात्। प्रमात्वञ्च व्यधिकरणप्रकारकान्यत्वं स्वाश्रयावृत्तिधर्मा-वच्छिन्नविषयताकान्यत्वमिति यावत्।

ननु प्रमात्वज्ञानवदन्यप्रागभावनिवेशपक्षेपि घटत्ववति घटत्वप्रकारकत्वेन पटत्वप्रकारकत्वावगाह्यबाधितप्रवृत्तिजनकत्वादि लिङ्गकपरामर्शजन्यघटत्ववतिघटत्वप्रकारकत्वविधेयकानुमितिमादाय अर्थान्तरप्रसङ्ग इतिं चेन्न । परामर्शे घटत्वप्रकारकत्वत्वभाने तस्यघटत्वप्रकारकत्वेतरावृत्तित्वघटितत्वेन तद्घटकप्रमात्वज्ञानावश्यंभावात्तादृशानुमितिप्रागभावस्य प्रमात्वज्ञानवदन्यत्वासम्भवात् । न चैवं भट्टमतासंग्रहः इति भ्रमितव्यम्। भट्टमते ज्ञानज्ञाततात्वेन च व्याप्तिग्रहात् प्रकृतप्रमात्वविशिष्टपूर्वव्यक्तिविषयकानुमितेरुपपादिततत्वात्।

[१९]यत्तु - चैत्रादिनिष्ठतज्ज्ञानविषयकज्ञानजन्यत्वेन यत् नैयायिक

---

१९. यत्तु - चैत्रादिनिष्ठतज्ज्ञानेति - प्र.वा-पृ.सं.-८१

अयमाशयः - तज्ज्ञानपदेन तस्य - प्रामाण्यस्य, तद्घटकस्य घटत्वप्रकारकत्वादेः वा ग्रहणे भट्टमतपरिग्रहो न स्यात् । तन्मते प्रमात्वमपुरस्कृत्य ज्ञानत्वेन व्यापकत्वज्ञानात् प्रमात्वेनानुमितेः मिश्रमतखण्डनावसरे निराकृतत्वात् प्रमात्वत्वावच्छिन्नव्यापकताज्ञानस्य च प्रकृतप्रामाण्याश्रयविषयकत्वनियमात् भट्टमते सङ्ग्राह्यायाः ज्ञाततालिङ्गकानुमितेः साध्यघटकज्ञानपदेन उपादानासम्भवात् । अतः तादृशज्ञानजन्यत्वेन यन्नैयायिकसिद्धं तद्भिन्नत्व-

सिद्धम् तदन्यज्ञानज्ञानग्राह्यत्वं विवक्षितम् । तेन ज्ञानत्वेन घटज्ञानमात्रविषयकज्ञानावगाहिपरामर्शात् घटत्ववतिघटत्वप्रकारकत्वे लाघवज्ञानसहकृतादुत्पन्नां घटत्ववतिघटत्वप्रकारकत्वेन पटज्ञानाद्यनुमितिमादाय अर्थान्तरनिरासः सामान्यप्रत्यासत्तिमङ्गीकुर्वतां नैयायिकानां परामर्शे ज्ञानसामान्यस्य विषयत्वात् उक्तानुमितेर्घटत्वप्रकारकत्वाद्याश्रयविषयकज्ञानजन्यत्वेन नैयायिकसिद्धत्वात्। यद्यपि व्यवसायानन्तरं द्विचतुरक्षणाभ्यन्तरज्ञानं भट्टैः ज्ञाततालिङ्गकानुमितित्वेन स्वीकृतमपि साक्षात्कारित्वेन नैयायिकसिद्धं तथापि आत्मभिन्नाविशेष्यकज्ञानग्रहएव तथा, न तु ज्ञातताविशेष्यको ज्ञानजन्यत्वग्रहो विषयविशेष्यको ज्ञानविषयत्वग्रहो वा । तादृशानुमितिग्राह्यत्वमादायैव भट्टमते पक्षे साध्यवत्त्वमुपपादनीयम् । न च ज्ञातताविशेष्यकानुमितित्वेन भट्टाभ्युपगतस्यापि प्राथमिकज्ञानस्य नैयायिकैरात्मविशेष्यकज्ञानग्रहत्वेन स्वीकारान्न तस्यैव नैयायिकासिद्धत्वमिति वाच्यम् । एवमपि व्यवसायरूपविशेष्यज्ञानजन्यत्वेन तस्य नैयायिकासिद्धत्वात् । प्राथमिकज्ञानग्रहस्य नैयायिकैः ज्ञानविशेष्यकत्वेनैव स्वीकरणीयत्वात् । पूर्वं विशेषणज्ञानाभावेन तन्मते तस्य विशेषणत्वासम्भवात् ।

मजन्यान्तार्थः इति दीधितौ उक्तम् । अतःतादृशज्ञानमुक्तम् (प्र.वा-पृ.सं.८१) नैयायिकमते ज्ञाततायाः शशविषाणकल्पत्वात् तादृशज्ञानजन्यत्वेन नैयायिकसिद्धभिन्नत्वं ज्ञाततालिङ्गकानुमितेः निर्वहति इति ।

न चैवं सति ज्ञानविशेषणकानुव्यवसायस्य व्यवसायविषयकज्ञानजन्यत्वेन नैयायिकसिद्धतया तमादाय मिश्रमते साध्यवत्त्वनिर्वाहो न सम्भवति इति वाच्यम् । यतः विशिष्टज्ञाने विशेषणज्ञानहेतुत्वमनङ्गीकुर्वाणेन मुरारिमिश्रेण प्राथमिकज्ञानज्ञानं तद्विशेषणकत्वेन स्वीकृतमपि नैयायिकैः ज्ञानविशेष्यकतयेव स्वीक्रियते। अतः तज्ज्ञानविषयकज्ञानजन्यत्वेन नैयायिकासिद्धतद्ग्राह्यत्वमादाय मिश्राणां पक्षे साध्यवत्त्वोपपत्तिरिति ।

तादृशज्ञानस्यैव च भट्टेनानुमितित्वस्य ज्ञातताज्ञानोत्तरत्वस्य च स्वीकारात् तदादाय भट्टानां साध्यवत्त्वोपपत्तेरिति गदाधरभट्टाचार्यैरुक्तम् । तन्न । नैयायिकसिद्धसंवादिप्रवृत्तिजनकत्वादिलिङ्गकानुमित्या प्रमात्वेन ज्ञानावगाहनेसति साध्यप्रसिद्धौ तन्मूलज्ञाततांलिङ्गकानुमितिग्राह्यतया अर्थान्तरप्रसङ्गापरिहारात् तस्यापि नैयायिकासिद्धत्वात् । न च तावत्तेषां स्वतस्त्वविवक्षापि अनुव्यवसायस्थानापन्नपूर्वप्रतीत ज्ञानविषयकज्ञातता-लिङ्गकानुमितिग्राह्यत्वस्यैव तदुद्देश्यत्वात् । ज्ञातता लिङ्गकानुमितिग्राह्यंत्वमात्रस्यैव तदुद्देश्यत्वे तन्मते स्वतस्त्वस्य पारिभाषिकत्वप्रसङ्गात् ।

[१००]यदपि तज्ज्ञानविषयकतज्ज्ञानसमानाधिकरणज्ञानाजन्यत्वे सति तज्ज्ञानसमानाधिकरणत्वेनान्तिमज्ञानं विशेषणीयम् । तज्ज्ञानपदं च प्रकृतप्रामाण्याश्रयपरं परामर्शस्य प्रामाण्याश्रयविषयकत्वाद्व्यावृत्तिः । प्रकृतप्रामाण्यघटकपटत्वादिप्रकारकत्वमादाय या यद्वन्निष्ठा यत्प्रकारिका

---

१००. यदपीति - प्र.वा-पृ.सं.-८७

नैयायिकसिद्धसंवादिप्रवृत्तिजनकत्वादिलिङ्गकानुमित्या प्रामाण्यप्रकारेण ज्ञानावगाहने सति साध्यप्रसिद्धौ तन्मूलकज्ञाततालिङ्गकानुमित्या प्रामाण्यग्रहेणेव भट्टमते साध्यनिर्वाहात् अनुव्यवसायस्थलीयपूर्वाप्रतीततज्ज्ञानविषयक सामान्यमुखव्याप्त्यधीनायाः ज्ञाततालिङ्गकानुमितेः न प्रामाण्यावगाहिता तन्मते सिद्ध्यति। एवं तेषां स्वतस्त्वसिद्धिरपि न सम्भवति । प्रामाण्ये तादृशप्रामाण्यभासकसामग्र्याः यथार्थेच्छादिलिङ्गकप्रामाण्यविशिष्टानुमिति सामग्रीतः अविशेषात्। नैयायिकासिद्धज्ञाततालिङ्गकत्वेन विशेषस्य स्वतस्त्वसम्पादकत्वोपगमे परिभाषामात्रोपगमेन स्वतः परतो वेति विवादा-पर्यवसानात्, ज्ञातताख्पपदार्थान्तरतदभावे एव विवादविश्रामः । अतः तादृशानुमितिव्यावर्तनाय तज्ज्ञानविषयकतज्ज्ञानसमानाधिकरणज्ञानाजन्यत्वे सति तज्ज्ञानसमानाधिकरणत्वेन अन्तिमज्ञानं विशेषणीयम् । इति भावः ।

ज्ञातता सा तद्वति तत्प्रकारकज्ञानजन्येति सामान्यमपि व्याप्तिग्रहात् पक्षधर्मताबलेन घटत्वादिघटितप्रमात्वावलीढज्ञानानुमितिः भट्टैरङ्गीकार्या। सा च घटत्वादिप्रकारकज्ञानमन्तरेणापि भवतीति न घटत्वादि प्रकारकत्वघटितप्रामाण्याश्रयविषयकज्ञानजन्येति न भट्टमतापरिग्रहः। न च यत्तदर्थाननुगमात्घटत्ववतीत्यादिप्रामाण्यानुमित्यौपयिकघटत्वातिरिक्ततत्तदर्थघटितप्रामाण्यत्वावच्छिन्ननिरूपितव्याप्तीनामानन्त्यात् असर्वज्ञदुर्विज्ञानतया प्रामाण्यप्रकारकानुमितिर्नसम्भवति। यत्किञ्चिदेकधर्मघटितसाध्यसाधनव्याप्तिज्ञानादेव प्रकृतधर्मघटितहेतौ पक्षधर्मताज्ञानात्तद्घटितसाध्यसिद्ध्युपगमे प्रकृतधर्मघटितहेतौ तद्घटितसाध्यव्यभिचारज्ञानदशायामपि यत्तदर्थान्तरघटितकिञ्चित्साध्यसाधनव्याप्तिज्ञानात् प्रकृतानुमित्यापत्तिः। यद्यदर्थघटितसाध्यसाधनोभयं यदोपस्थितं तदानीं तस्यानुमितौ तत्तत्साध्यसाधनोभयव्याप्तीनां ज्ञानस्य हेतुतास्वीकारे तदानीं अप्रसिद्धसाध्यस्यैव तदीयव्याप्तिज्ञाननिरपेक्षानुमितिस्वीकारेपि नोक्तातिप्रसङ्गवारणसम्भवः। तत्साध्याप्रसिद्धिस्थलीयानुमितिसामग्र्यास्तत्साध्यस्य तद्धेतौ व्यभिचारग्रहदशायामपि सत्त्वात् तत्कालस्य तत्र हेतुतया अतिप्रसङ्गवारणे व्याप्तिज्ञानहेतुतावैयर्थ्यादिति वाच्यम्। तत्तदर्थघटितसाध्यसाधनव्याप्तिज्ञानविरहविशिष्टतत्तदर्थघटितसाध्यसाधनोपस्थितेः प्रतिबन्धकतां यत्किञ्चिदेकार्थघटितसाध्यसाधनोभयव्याप्तिज्ञानस्य च हेतुतां स्वीकृत्य अतिप्रसङ्गस्य वारणीयत्वात् तदर्थघटितहेतौ पक्षधर्मताज्ञानमेव पक्षे तत्तदर्थघटितसाध्यसिद्धौ नियामकमास्थेयमित्याहुः।

तन्न। तथा ज्ञानत्वेन ज्ञाततात्वेन पटज्ञानादियत्किञ्चिज्ज्ञानविषयकपरामर्शात् घटत्ववतिघटत्वप्रकारकलाघवज्ञानसहकृतात् प्रमात्वविशिष्टघटज्ञानानुमितिमादाय अर्थान्तरस्यावारणात्। ज्ञाततालिङ्गकत्वेन नैयायिकासिद्धत्वस्य परामर्शे घटज्ञानाभानेन तज्ज्ञानविषयकज्ञाना-

जन्यत्वस्य च सत्वात्। व्यवसायद्वितीयक्षणोत्पन्नस्य ज्ञानविशेष्यकज्ञानस्य तद्धेतुताङ्गीकारात्।

मिश्रमतसंग्रहस्य प्रस्तावः, तत्खण्डनञ्च

[१०१]यत्तु व्यवसायानन्तरोत्पन्नमेव ज्ञानं तन्मते प्रामाण्यग्राहकं, विशेषणज्ञानहेतुत्वमनङ्गीकुर्वाणेन मुरारिमिश्रेण प्राथमिकज्ञानज्ञानं तद्विशेषणकत्वेन स्वीकृतमपि नैयायिकैः ज्ञानविशेष्यकतयैव स्वीक्रियते। अतस्तज्ज्ञानविषयकज्ञानजन्यत्वेन नैयायिकसिद्धभिन्नतद्ग्राह्यत्वमादाय मिश्राणां पक्षे साध्यवत्त्वोपपत्तिरिति पुनः गदाधर भट्टाचार्यैरुक्तम्।

तन्न। विशेषणज्ञानस्थानापत्तिमात्रेण तथोपपादने योयद्धर्मवद्विशेष्यकयत्प्रकारकेच्छावान् स तद्धर्मवद्विशेष्यक तत्प्रकारकज्ञानवान् इत्यादि घटत्वादीतरकिञ्चिद्धर्मघटितसामान्यव्याप्तिग्रहसहकृतात् घटेच्छावान्चैत्र इत्यादि पक्षधर्मताज्ञानाद्विशेष्ये-विशेषणं तत्र च विशेषणान्तरमिति न्यायेन जनितायाः घटप्रमावान् चैत्र इत्याद्यनुमितेः अवारणेन अर्थान्तरस्य दुष्परिहरत्वापायात्। विशेषणज्ञानहेतुतावादिना नैयायिकेन तत्र घटत्ववति घटत्वप्रकारकत्वघटकसकलपदार्थ-तज्ज्ञानविषयकसमूहालम्बनरूपविशेषणज्ञानमुपकल्प्य तदुत्तरम् उक्तानुमितिमुपपाद्य तज्ज्ञाने, तज्ज्ञानविषयकज्ञानजन्यत्वाभ्युपगमेपि विशेषणज्ञानहेतुतामनङ्गीकुर्वाणैः मिश्रैः तादृशविशेषणज्ञानस्थानेऽभिषे-चितायास्तस्यास्तुल्यन्यायेन तज्ज्ञानविषयकज्ञानजन्यत्वेन नैयायिक-सिद्धत्वोपपादनासम्भवात्। तादृशविशेषणज्ञानजन्यत्वेन नैयायिका-भ्युपगतज्ञानसमानाकारज्ञानत्वाविशेषात् तज्ज्ञानज्ञानजन्यत्वेन नैयायिक-सिद्धत्वाभ्युपगमे मिश्रमतासंग्रहप्रसङ्ग इति भवतामुभयतः पाशात्।

---

१०१. विशेषणज्ञानहेतुत्वमिति - प्र.वा-पृ.सं.-८२

मिश्रमतसंग्रहार्थं पक्षान्तरप्रस्तावः

[१०२]यत्तु ज्ञानत्वविशिष्ट प्रकृतप्रामाण्याश्रयविषयकज्ञानजन्यत्वेन नैयायिकसिद्धभिन्नत्वं विवक्षितं व्यवसायाव्यवहितोत्तरविशेषणज्ञानं च ज्ञानत्वांशे निर्विकल्पकम्। नचैवं ज्ञानत्वविशिष्टवैशिष्ट्य-बोधरूपतानुपपत्त्या तादृशविशेषणज्ञानस्यापि ज्ञानत्वविशिष्टविषयकत्व-मावश्यकमिति वाच्यम्। तथा सति ज्ञानत्वरूपविशेषणज्ञानापेक्षाप्रसङ्गात् तृतीयक्षणे प्रत्यक्षानुपपत्त्या तृतीयक्षणे व्यवसायनाशेन चतुर्थक्षणे च तत्प्रत्यक्षस्य सर्वथाऽसम्भवेन अनुव्यवसायस्य ज्ञानत्वविशिष्ट वैशिष्ट्यबोधतानङ्गीकारात् विशेष्ये विशेषणं तत्र विशेषणान्तरमिति न्यायेन ज्ञाने ज्ञानत्वभानाङ्गीकारेण ज्ञानत्वांशे निर्विकल्पकज्ञानेनैव निर्वहणीयत्वात्। तथा च आत्मविशेष्यकानुव्यवसाय संग्रह इति कैश्चिदुक्तम्।

तत्तु ज्ञानत्वघटितप्रमात्वपक्षतायामेव घटते नान्यथा। घटत्ववति घटत्वप्रकारकवानयमिति ज्ञानमादाय सिद्धसाधनापत्तेरिति स्वयमेव परिहृतम्। न च घटत्ववति घटत्वप्रकारकत्वाश्रयेच्छाविषयक-पक्षधर्मताज्ञानजन्यत्वेन निरुक्तानुमिति व्यावृत्तिः सम्भवतीति वाच्यम्। परतस्त्वेन स्वीकृतस्य इच्छादिनिष्ठस्य, स्वतस्त्वेन विवक्षितस्य ज्ञाननिष्ठस्य च घटत्ववति घटत्वप्रकारकत्वस्य विलक्षणत्वादन्यथा यथार्थ घटेच्छादिशिरोमणिग्रन्थस्य तद्विवरणस्वग्रन्थस्य च विरोधप्रसङ्गः।

---

१०२. ज्ञानत्वविशिष्टप्रकृतप्रामाण्यश्रयेति - ज्ञानत्वविशिष्टप्रकृतप्रामाण्याश्रय ज्ञानजन्यत्वेन यत् नैयायिकसिद्धं तद्भिन्नत्वमजन्यन्तार्थः। तथा च जानामीत्याकारकोऽनुव्यवसायः व्यवसायरूपविशेषणज्ञानजन्यत्वेन न्यायमतसिद्धोऽपि न ज्ञानत्वादिविशिष्टविषयकज्ञानजन्यत्वेन तन्मतसिद्धः, निर्विकल्पकरूपविशेषणज्ञानविषयकज्ञानादेव विशेष्ये विशेषणमित्यादि रीत्या तदुत्पादस्य तैरुपगमादिति तत्सङ्ग्रह इति भावः।

यथार्थघटेच्छादिशिरोमणिग्रन्थविरोधोपपादनम्

तथा हि । प्रथमं तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यत्वं यथाश्रुतं तज्ज्ञानभिन्नघटज्ञानविषयक[१०३] यथार्थघटेच्छादिलिङ्गकप्रमात्वविशिष्ट तज्ज्ञानविधेयकानुमितिग्राह्यतयार्थान्तरप्रसञ्जकं इत्युक्त्वा तज्ज्ञानपदस्य प्रकृतप्रामाण्यश्रयपरत्वे तद्घटकघटत्वादिप्रकारकत्वाद्याश्रयपरत्वे वा नार्थान्तरमिति परिहृत्य भट्टमतासंग्रहमुद्भाव्य या यद्वन्निष्ठयन्निरूपित ज्ञातता सा तद्वतितत्प्रकारकज्ञानजन्येति पटत्वादिघटित सामान्यमुख-व्याप्तिग्रहावलम्बनेन प्रकृतघटत्वघटित प्रामाण्याद्याश्रयविषयक-

---

१०३. यथार्थघटेच्छादीति-प्र.वा-पृ.सं.७८

'ननु यथार्थघटेच्छासंस्कारतत्त्वादिहेतुकया पक्षधर्मताबलात् घटप्रमात्वविशिष्टापूर्वव्यक्तिग्राहिण्या अनुमित्या ग्राह्यत्वात् सिद्धसाधनम्, अथ तज्ज्ञानपदेन तस्य - प्रामाण्यस्य तद्घटकस्य तत्प्रकारकत्वादेर्वा आश्रयमात्रस्याभिधानाददोषः, इति चेन्न भट्टमतापरिग्रहाप्रसङ्गात् । यत्तद्भ्यां सामान्यतो व्याप्त्या प्रामाण्यविशेषलाभस्तु प्रकृतेऽपि दुर्वारः । यत्र एतादृशानुमानावतारः तस्य पक्षवहिर्भावे तु सर्वज्ञाः एव तदवतारभाजनं प्रष्टव्याः । अत्राहुः तादृशंज्ञानजन्यत्वेन यन्नैयायिकसिद्धं तद्भिन्नत्वं अजन्यान्तेन विवक्षितमि'ति दीधितिग्रन्थसन्दर्भः ।

तत्र यथार्थेत्यादिना सिद्धसाधनमित्यन्तेन मीमांसकमते सामान्यस्य प्रत्यासत्तित्वविरहेण, विशेषणज्ञानस्य विशिष्टबुद्धौ अजनकत्वेन प्रमात्वेन व्यक्त्यन्तरविषयकपरामर्शादपि अज्ञातव्यक्तिप्रकारकानुमितेः सम्भवात् घटत्ववतिघटत्वप्रकारकत्वरूपयाथार्थ्यविशिष्टघटेच्छातथाविधसंस्कारादि हेतुकया घटत्वघटितप्रामाण्यविशिष्टापूर्वव्यक्तिग्राहिण्या अनुमित्या ग्राह्यत्वात् अर्थान्तरमुद्भावितम् ।

अथेत्यादिना अदोषः, इत्यन्तेन तत्परिहारः कृतः । नेत्यादिना भट्टामतासङ्ग्रहः उद्भावितः। यत्तद्भ्यामित्यादिना दुर्वारः इत्यन्तेन ग्रन्थेन तन्मतपरिग्रहप्रयास विशेषः अर्थान्तरतादवस्थ्येन परिहृतः । अत्राहुरित्यादिना विप्रतिपत्तिस्वरूपं परिष्कृत्य अर्थान्तरं वारितमिति रीतिः । इति शम् ॥

व्याप्तिग्रहजन्यैव ज्ञाततालिङ्गकानुमितिरिति तत्संग्रहमुपन्यस्य तद्वदेव या यद्धर्मवद्विशेष्यिका यत्प्रकारिकेच्छा सा तद्वद्विशेष्यकत्वावच्छिन्न-तत्प्रकारकज्ञानजन्येतिपटादिज्ञानविषयकव्याप्तिज्ञानात् घटत्वघटित-प्रकृतहेतोः पक्षधर्मताज्ञानेन सहकृताज्जनितां प्रकृतप्रमानुमितिमादाय घटत्ववति घटत्वप्रकारकत्वाद्याश्रय विषयकज्ञानाजन्यत्वनिवेशेप्यर्थान्तरं दुष्परिहरमित्याशङ्क्य तत्परिहाराय तज्जन्यत्वेन नैयायिकसिद्धभिन्नत्वं निवेशितम्। शिरोमणिना परिष्कृतं चेत्थमेव भवति। तत्सर्वमेवंसति विरुद्धं स्यात्। तादृशानुमितेरपि घटत्ववति घटत्वप्रकारकत्वाद्यश्रयेच्छादि-दिषयकपक्षधर्मताज्ञानजन्यत्वादित्यास्तां तावत्।

द्वितीयपक्षेलक्षणनिष्कर्षप्रदर्शनम्

प्रकृतमनुसरामः। ननु तज्ज्ञानज्ञानवदन्यप्रागभावप्रतियोगि-ज्ञानग्राह्यत्वमिति द्वितीयपक्षे ज्ञानत्वेन पटज्ञानविषयकपरामर्शात् घटत्ववति घटत्वप्रकारकत्वे लाघवमिति लाघवज्ञानसहकृतात् घटत्ववति घटत्वप्रकारकत्वेन घटज्ञानानुमितिमादाय अर्थान्तरं दुर्वारम्। यदि च तन्निरसनाय तज्ज्ञानज्ञानवदन्यत्वेन नैयायिकसिद्धत्वंप्रागभावे विवक्षिष्यते। व्यवसायद्वितीयक्षण एव अनुव्यवसायस्य स्वीकृतत्वात् नास्माकं गदाधरोक्तरीत्या विशेषणज्ञानजन्यतामादाय मिश्रमतासंग्रहः। न च अनुमित्याद्यनुरोधेन न ज्ञानज्ञानत्वप्रकारकप्रत्यक्षं, व्यवसायक्षणे तत्कारणज्ञानज्ञानत्वज्ञानानियमादिति वाच्यम्। स्वाव्यवहितप्राक्क्षणावच्छेदेन अभावत्वज्ञानं विनाप्यभावत्वप्रकारका-भावज्ञानानुभवेन अभावत्वज्ञानजन्यतावत् अभावत्वप्रकारकज्ञानत्व-घटकप्रकारतायामिव ज्ञानज्ञानत्वज्ञानजन्यतावच्छेदकज्ञानज्ञानत्व-प्रकारकज्ञानघटकप्रकारतयोरपि लौकिकान्यत्वनिवेशसम्भवेन अनुव्यवसायस्य च ज्ञानज्ञानप्रकारतयोः मनः संयुक्तसमवाय तत्संयुक्तसमवेतसमवायलक्षणलौकिकसन्निकर्षजन्यतावच्छेदकतया

लौकिकत्वेन ज्ञानज्ञानत्वज्ञानापेक्षोत्पत्तिसम्भवात् । इदमेवाध्यक्षं त्रिचतुरादिक्षणान्तरितज्ञाततालिङ्गकानुमितत्वेन स्वीकृतमिति तत्प्रागभावोपि तज्ज्ञानज्ञानवदन्यत्वेन नैयायिकसिद्ध एवेति न तन्मतासंग्रहः। न्यायमतसिद्धज्ञानप्रमानुमितिमूलकज्ञाततालिङ्गकानुमिति प्रागभावो न तज्ज्ञानज्ञानवदन्यत्वेन नैयायिकसिद्ध इति तामादायापि नार्थान्तरप्रसङ्गः।

न चैवं व्यवसायपूर्वोपनीतप्रमात्वागाह्यनुव्यवसायग्राह्यत-यानैयायिकमतेसिद्धसाधनमिति वाच्यम्। यत्र यदुपनीतं पूर्वं तत्रैव तस्यो-पनीतभानमितिचिरनैयायिकैकदेशिमताभ्युपगमैनैव एतद्विवक्षानुसरणात् तथा च प्रागुक्तभ्रमाजन्यत्वप्रमात्वेपिननिवेशनीये । यदि प्रागुक्तप्रयोजनेनोक्तार्थान्तरप्रसङ्ग इति मन्यते, तदात्रापिनिष्कर्षेभ्रमाजन्यत्वं निवेशनीयम्। घटत्ववति घटत्वप्रकारकत्वेन पट ज्ञानविषयकघटत्ववति-घटत्वप्रकारकत्वसामान्यप्रत्यासत्तिजन्यज्ञानमादाय सिद्धसाधनस्यान्यथा-दुष्परिहरत्वात्।

मनसिनिधाय तदेवपरिष्करोति

तज्ज्ञानज्ञानज्ञानवतोऽन्यत्वेनन्यायवित्प्रसिद्धस्य।
ग्राह्यं नान्त्यं ज्ञानंप्रतियोगिप्रागभावस्य ॥ १० ॥

दशमश्लोकार्थविवरणम्

अयं भावः। पूर्वश्लोकवृत्तिस्वकालापरत्वाभ्यामित्यनुषज्यते । तथाच स्वध्वंसत्वावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिता-वच्छेदकताकभेदवत्त्वकालिकविशेषणतोभयसम्बन्धेनतज्ज्ञानज्ञान-वद्भिन्नत्वेननैयायिकसिद्धो यः प्रागभावः तत्प्रतियोगिज्ञानग्राह्यंनवेति-निष्कर्ष' इति । सर्वत्र ग्राह्यत्वं स्वरूपसम्बन्धनिष्ठसांसर्गिकविषयता-निरूपकप्रकारता तेंनतत्सम्बन्धेनावृत्तौनिषेधस्य प्रसिद्धिः। अत एव च न

घटभिन्नत्वादिसामान्यलक्षणजन्यज्ञानमादायविधौसिद्धसाधनम् । यद्यपि स्वरूपसम्बन्धेनावृत्तेरपि अन्यथाख्यातिमुपगच्छतां भट्टमिश्राणांमते तत्सम्बन्धावच्छिन्नप्रकारतासम्भवस्तथापि सर्वस्य तादृशभ्रमप्रकारतायां-मानाभावात् यस्याङ्कुरादेः स्वरूपसम्बन्धेन अवगाहिभ्रमो न चातस्तत्रनिषेधप्रसिद्धिरित्यवधेयम् । उत्तरज्ञानेच चैत्रत्वाद्यवच्छिन्ना-वच्छेदकताकत्वेन विशेषणीये पुरुषान्तरीयज्ञानत्व सामान्यलक्षण-जन्यज्ञानरूपतज्ज्ञानविषयकज्ञाने प्रकृतानुव्यवसायस्य प्रागभावासत्वाद-सम्भव इति तज्ज्ञानविषयकज्ञाने चैत्रत्वावच्छिन्नावच्छेदकताकत्वनिवेशः चैत्रशरीरावच्छिन्नप्राथमिकानुव्यवसाये तत्पूर्वकालिकपुरुषान्तरीय-घटत्ववति घटत्वप्रकारकत्वादिसामान्यप्रत्यासत्तिजन्यज्ञानप्रागभावस्य कालिकविशेषणतया असत्वात् तद्ग्राह्यतया सिद्धसाधनवारणाय चरमज्ञाने चैत्रत्वावच्छिन्नावच्छेदकताकत्वनिवेशः । नचानुव्यवसायादि प्रागभावस्यापि तद्व्यक्तिप्राक्कालिकज्ञानत्वादि सामान्यप्रत्यासत्ति-जनितज्ञाने कालिकविशेषणतया सत्वादसङ्ग्रहः इति वाच्यम्। यद्व्यवसायव्यक्तेः पूर्वं तद्वतः पुरुषस्य तद्व्यक्तिविषयकं किमपिज्ञानं नाभूत् तद्व्यक्तेरेव तज्ज्ञानपदेन विवक्षणीयतया अनुपपत्त्यभावात् । तज्ज्ञानज्ञानज्ञाने तज्ज्ञानप्रागभावानधिकरणत्वनिवेशनं तु नसत् । घटत्ववति घटत्वप्रकारकत्वसामान्यलक्षणजन्यज्ञानोत्तरकालोत्पत्तिक-चैत्रीयघटज्ञानव्यक्तिग्रहणे सिद्धसाधनात् । एवं च यन्व्यवसायपूर्वं प्रमात्वस्य तद्घटकपदार्थानां वा स्मृतिः तव्द्यक्तिरप्यत एव निरस्ता इति सूक्ष्ममीक्षणीयमित्याहुः ।

योगजधर्माजन्यत्वस्यान्तिमज्ञाने विशेषणत्वकथनम्

ननु योगिज्ञाने तज्ज्ञानप्रामाण्यस्य विषयत्वात् नैयायिकानां विधौ सिद्धसाधनं निषेधविषयकयोगिज्ञानेपि विशेषणज्ञानकारणातायाः अविवादात् प्रथमं प्रमात्वज्ञानमावश्यकं तत्र च योगजधर्मबलात्

प्रमात्वाश्रयस्यापि भाने बाधकाभावात् न तत्प्रागभावस्य निरुक्ताजन्यत्वसंभवइति वाच्यम्। प्रमात्वोपस्थित्या तद्धटक पदार्थसमूहालम्बनोपस्थित्या वा सहकृताद्योगजधर्माद्यत्र प्रथमज्ञाने प्रमात्वभानं तदादायोक्तदोषस्य द्वितीयपक्षे दुर्वारत्वात् इति चेत् न। योगजधर्माजन्यत्वांशस्यापि अन्तिमज्ञाने विवक्षणीयत्वात्। ज्ञानभेदेन प्रकारिताभेदपक्षे घटत्ववति घटत्वप्रकारकत्वत्वरूप पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतायां अंशतः सिद्धसाधनस्या दोषत्वाच्च ज्ञानत्वावच्छिन्नभिन्नत्वे नात्मविषयक निदिध्यासनजन्यतया तदीयप्रागभावस्य तज्ज्ञानज्ञानत्वेन नैयायिकसिद्धतया तदन्यत्वेन नैयायिक सिद्ध्यविषयत्वाच्चेति दिक्।

इति श्रीकिरीटिवेङ्कटाचार्यविरचितं प्रामाण्यवादखण्डनम्।

श्री हयग्रीवाय नमः।

श्री कृष्णार्पणमस्तु।